दशमः पटलः

देवे स्वभक्तजनतानुजिघृक्षयार्चो-
पाधौ तथा नियतसन्निधिमादधाने।
श्रेयोदुरासदतया तदपासनार्थं
स्याच्चेन्निमित्तमथ निष्कृतिमादधीत।।१।।

विमर्शिनी

एवं नवभिः पटलैः भूमिपरिग्रहादितीर्थाभिषेकावधिकं क्रमेण[१] तूक्तं कर्मकलापमभिधायाथ प्रतिष्ठितस्य देवस्यावश्यकर्तव्याया नित्यपूजायाः केनापि निमित्तेन विरोधे प्राप्ते तत्परिहाराय दशमपटलेन निष्कृतिं वदन् तत् प्रस्तौति-देव इति। स्वभक्तजनतानुजिघृक्षया स्वस्मिन् भक्तस्य जनसमूहस्यानुग्रहेच्छया अर्चोपाधौ प्रतिमारूपे स्वाश्रये तथा उक्तक्रियाभिः नियतसन्निधिं नित्यसान्निध्यम् आदधाने कुर्वाणे देवे पुजकस्य श्रेयोदुरासदतया श्रेयसो दुष्प्रापकत्वाद्धेतोर्गर्हितं निमित्तं स्याच्चेत् संभवेद् यदि अथ तदनन्तरमेवाविलम्बितं तदपासनार्थं तस्य दुर्निमित्तस्य परिहाराय निष्कृतिं प्रायाश्चित्तमादधीत।।१।।

१.'णेत्युक्तं' ख. ग. घ. ङ. च पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

हरिः ।। एवं तावत् प्रतिष्ठितस्य देवस्य नित्यकर्मपूजोत्सवादिकमुक्तम् । नैमित्तिकन्तु वक्तव्यम् । तत्र प्रायश्चित्तं जीर्णोद्धारापेक्षया नित्यं तन्निमित्तानां प्राचुर्यतस्सम्भवादिति प्रायश्चित्तं पूर्वं वदन् देवे निमित्ततन्निष्कृत्योरसम्भवे बिम्वोपाधिवशात्तत्सम्भवं दर्शयति - देव इति । देवे तथार्चोपाधौ नियतसन्निधिमादधाने[1] निमित्तं स्याच्चेदथ निष्कृतिमादधीतेति सम्बन्धः । तथेत्युक्तप्रतिष्टाप्रकारानुवादः । नियतो नित्यो न तु मण्डलादाविवापेक्षिकः सन्निधिः तमादधाने स्वेच्छया कुर्वति ।

"सान्निध्यञ्च तथा देव प्रत्यहं परिवर्धय ।"

इति हि प्रतिष्टायामर्[2]थितम् । तत्र हेतुः स्वभक्तजनतानुजिघृक्षया इत्युक्तः । निमित्तं प्रायश्चित्तस्यैव हेतुः । यद्वा स्वभक्तजनताया एव 'सभूपालं तथा राष्ट्रम्' इत्यादिरूपायाः नानाविधविपत्सूचकहेतुरुत्पातः तस्य देवे दोषरूपं कार्यम् । तदपासनार्थमित्युक्तम् । तस्य नियतस्यापि सन्निधेरपासनं तद्विरोध्यपसंस्काराधानेनापोहनं तदर्थमिति । प्रागाहितसान्निध्यस्य निमित्तजन्यापसंस्कारैरपायसम्भव इति भावः । तत्र हेतुश्श्रेयोदुरासदतया इत्युक्तः । श्रेयश्शब्देन पूजोत्सवादिलभ्योऽनुग्रहोऽभिप्रेतः । निमित्तं स्याच्चेदिति वदतोऽयमाशयः । न तावन्निमित्तैरपि देवायतने भाव्यमिति ततश्च तदनवकाशकरणे यजमानादिभिर्महान् यत्न आस्थेय इति । यथा राक्षोघ्नादिजपः सुरभिधूपाजस्रदीपादिपरिकल्पनमवहितै- मार्जनालेपनादीनां नित्यत्वं रक्षिणां सभागोपुरादिषु सन्निधानमिति । यत उक्तं -

"प्रासादगर्भपीठार्चाः शरीरत्वेन शार्ङ्गिणः ।
कथिताः सर्वदा रक्ष्या विप्रैरुत्पातशङ्कया ।।"

इति । निष्कृतिः प्रायाश्चित्तं देवे बिम्बोपाधियोगतो निमित्तसम्भवे तत्प्रतिक्रियादिसम्भव इति भावः । सति निमित्ते सद्यः प्रायश्चित्तं कर्तव्यमित्यथेत्युक्तम् ।।१ ।।

क्षेत्रे मृतिर्जननमङ्गणमण्डपादौ
मूत्रासृगादिपतनं पतितादिवेशः ।
सोलूकगृधकरटश्वखरोष्ट्रकोल-
क्रोष्ट्वृक्षडुण्डुभपुरसरगर्भवेशः ।।२ ।।

---

१. 'नेन नि' २. 'मवस्थितम्' क पाठः ।

Shripuram Publications
www.shripuram.org

विमर्शिनी

निमित्तानि गणयति - क्षेत्र इति। क्षेत्रे मर्यादासीमाया अन्तर्भागे मृतिर्जननं च मनुष्याणां मरणं जननं च। अङ्गणमण्डपादौ प्रासादालिन्दाङ्गणमण्डपबलिपीठिकादौ मूत्रासृगादिपतनम् आदिशब्देन पुरीषादिकं च। पतितादिवेशः पतिताः स्वकुलाद् भ्रष्टाः तेषा चण्डालदीनां च गोपुरादन्तः प्रवेशः। सोलूकगृध्रकरटश्वखरोष्ट्वृक्षडुभ- पुरस्सरगर्भवेशः सोलूकः उलूकश्च (ഉലൂകം=ഊമൻ, ഗൃധ്രം=കഴുക്, കരടം=കാക്ക) श्वा सारमेयः (ഖരം=കഴുത, ഉഷ്ട്രം=ഒട്ടകം, കോലം=പന്നി, ക്രോഷ്ടാ=കുറുനരി, ഋക്ഷം=വാനരം, ഡുണ്ഡുഭം=ചേര) पुरस्सरशब्देन श्येनकुक्कुटादयः। एतेषां गर्भगृहप्रवेशः।।२।।

विवरणम्

तत्र निमित्तानि तावद्वदन् प्रथमं सामान्योत्पातरूपाणि निमित्तान्याहक्षेत्रे मृतिरिति। क्षेत्रं देवायातनं प्राकाराभ्यन्तरदेशः। तत्र मृतिर्जननमिति एतानि निमित्तकानीत्युपरि सम्बन्धः। केषां मृतिर्जननं वेति मनुष्याणां पशूनाञ्च प्रसिद्धत्वात्। तत्र ब्राह्मणशूद्र-दिजातिवशाद् गवाश्वादिजातिवशात् प्रासादप्राङ्कणा[१]दिदेशवशाच्च दोषभेदः। वक्ष्यति च। गुरुलाघवभेदवन्तीति। अङ्कणमण्डपादौ मूत्रासृगादिपतनमिति। अङ्कणम-न्तर्मण्डला[२]न्तर्भागः मण्डपश्च पूजामण्डपः। यद्वा अङ्कणं[३] मध्यहारान्तर्भागो मण्डपश्च बलिपीठमण्डपः। आदिशब्देन प्रासादादिग्रहणम्। मूत्रादीनि मूत्रपुरीषादिमलानि। असृगादीनि रुधिरमांसाद्यङ्गानि। केषामिमानीति। मनुष्याणां पशूनाञ्चैव। पूर्ववद्दोषभेदः। पतितादिवेश इति। पतितानामङ्कणमण्डपादावावेशः। पतिता महापातकादिदोषवशाद् भ्रष्टाः। आदिशब्देनाशौचिनश्चातुर्वर्ण्यबाह्या म्लेच्छपाषण्डिनो दाहकादयश्चोरा व्रात्याश्च गृह्यन्ते। प्राग्वद्दोषभेदः। एवं सामान्योत्पाताः। अथ वैकल्पिकाः सोलूकेति। करटः काकः। कोलो वराहः। ऋक्षो वानरः पुरस्सरशब्द आद्यर्थः। तेन चकोरकपिञ्जलचातकवला-कातित्तिरिश्यामकपोतादीनां गर्दभव्याघ्रादीनामपि ग्रहणम्। तेषां गर्भगृहे प्रवेशः। यत्र देश उलूकादायः प्रचुरास्तत्र सामान्योत्पातकत्वं इतरत्राद्भुतोत्पातकत्वमित्येवं इह विकल्पः। गर्भग्रहणं च प्रचुरविषयाभिप्रायम्। इतरत्र प्रासाद आवेशोऽपि गृह्यते। अत्रापि दोषभेद ऊहनीयः।।२।।

---

१. ‘णात् देवव’। २. ‘लमन्त’ ३. ‘ण’ क पाठः।

Shripuram Publications
www.shripuram.org

बिम्बस्य पातचलनादिरथ प्रदाह-
स्वेदप्ररोदहसितानि तथाद्भुतानि।

छत्राकनाकुमधुकादिसमुद्गमाश्च
पूजाविलुप्तिरपि चासति दिष्टदोषे।।३।।

विमर्शिनी

अथ बिम्बस्य पातचलनादिः पतनचलनस्फुटनादीनि। तथाद्भुतानि आश्चर्यभूतानि प्रदाहस्वेदप्ररोदहलितानि। प्रदाहः औष्णयं, स्वेदः स्वेदजलस्रवः, प्ररोदः भावे दुःखप्रतिभानम्। छत्राकनाकुमधुकादिसमुद्गमाश्च। (ഛത്രാകം = കൂൺ, നാകു = പുറ്റ്, മധുകം = തേൻ, ആദിശബ്ദേന കടന്നൽ കൂടാദി) दिष्टदोषे निर्दिष्टदोषे असति अभावे निमित्तभावे पूजाविलुप्तिरपि। अनेन निमित्ते सति पूजा न कार्येत्यापि सूचितम्।।३।।

विवरणम्

अद्भुतरूपाणि निमित्तानि दर्शयति-छत्राकेति। नाकुर्वल्मीकं, [१]मधुकं मधुनीडम्। आदिशब्ददेन कृमिकीटनिकरादीनामुत्काशनिपातभूकम्पादीनामपि ग्रहणम्। एतच्च सर्वं क्षेत्रेऽभिप्रयते। यदुक्तम्- 'अथ [२]प्रासादहारासु वल्मीकमथवा मधु' इत्यादि। विमाने वाशनिः पतेद् गोपुरे वेत्यादि। पूर्ववद्दोषभेदः। अर्चा(?) स्वेदप्ररोदहसितानीति वैवर्ण्यालापाद्युपलक्षणमेतत्। [३]तथा प्रदाह इति बिम्बप्रासादयोरेतत्सम्भवः। बिम्बस्य पातचलनादिरिति [४]दिगाश्रयावनत्यादेरादिशब्देन ग्रहणम्। बिम्बस्याङ्गभङ्गो हस्तपादादीनां छेदभेदस्फोटादिः तथा प्रभामण्डलकिरीटाद्युपाङ्गानामपि भङ्गः पारिषदानामङ्गदेवतानामपि भङ्ग इति। एतच्च सकलोपहत्युपलक्षणम्। तदुक्तं- 'पार्षदोपहतिष्वपी'ति [५]यथाष्टमूर्त्याद्युपघातो महाबलिपीठोपघातो ध्वजोपघात इति। यद्यपि प्रदाहादिषूद्धार उत्तरपटलेऽभिमतः, किन्तु निष्कृतियोगतस्स कार्यः। तस्य वा बह्वर्थव्ययसाध्यतया विलम्बसम्भवे निष्कृतिमात्रमपि सद्यः कर्तव्यं ज्वालास्पर्शादिषु वा स्यान्निष्कृतिमात्रं न तूद्धार इति प्रदाहादीनामिहाप्यभिधानम्। पूजाविलूप्तिरपि चासति दिष्टदोषे इति। क्षेत्रे मृतिर्जननमित्याद्यु[६]पदिष्टसम्भवे तावत् सद्यः प्रायश्चित्तं कृत्वैव नित्यपूजादि सर्वं

१. 'मधुकनीडम्' ख पाठ २. 'प्राकारहा' क पाठः। ३. 'दो' च पाठः। ४. 'शा' ५. 'अ' च पाठः। ६. 'घुद्दिष्ट' घ. च पाठः।

Shripuram Publications
www.shripuram.org

कार्यमित्यप्यर्थाद्दर्शितं भवति। तदुक्तम-

"अकृतायां तु निष्कृत्यामपूज्यं सर्वथा बुधैः।" इति।।३।।

क्षुद्रान्यमन्त्रयजनं प्रतिषिद्धदुष्ट-
पुष्पादिपूजनमथो मरिचादिलेपः।
एतानि तन्त्रकथितानि निमित्तकानि
ज्ञेयानि तत्र गुरुलाघवभेदवन्ति।।४।।

विमर्शिनी

क्षुद्रान्यमन्त्रयजनम् आभिचारकर्मणे क्षुद्रमन्त्रेण पूजनं च। प्रतिषिद्धदुष्टपुष्पादिपूजनं निषिद्धैरशुद्धैर्वा पुष्पादिभिः पुष्पगन्धजलनिवेद्यादिभिः पूजनम्। अथो मरिचादिलेपः मरिचादितीक्ष्णद्रव्यैर्लेपनं च। एतानि तन्त्रकथितानि तन्त्रेषु कथितानि निमित्तकानि। तत्र तेषु मध्ये गुरुलाघवभेदवन्ति एतद् गुरु एतल्लघ्विति भेदेन साधकैर्ज्ञेयानि।।४।।

विवरणम्

क्षुद्रान्यमन्त्रयजनमिति। क्षुद्रमन्त्राः क्षपणमन्त्रादयः[1] अन्यमन्त्राः विष्णौ शैवः शिवे वैष्णव इत्येवमादयः। प्रतिषिद्धदुष्टपुष्पादिपूजनमिति कर्मशेषाद् ग्राह्याग्राह्यपुष्प-तण्डुलाद्यवगमः। मरिचादिलेप इति। यथोक्तं -

"मरिचलवणोन्मत्तहिङ्गुपाषाणसर्षपैः।
प्रयोगज्ञैः सुसंलिप्ते विष्णुबिम्बे समाहितैः[2]।।"

इति। तन्त्रकथितानीति क्षेत्रे कलहादीनामन्येषामपि निमित्तानामुपसंग्रहार्थम्। गुरुलाघवभेदवन्तीति। निमित्तानामेषां जातिदेशादिभेदवशाद् गौरवं लाघवञ्च भेदो भवतीति भावः। एतञ्च यथाप्रयोगं वक्ष्याम इति।। ४।।

प्रासादोऽर्चा च विश्वेशितुरिह वपुषी स्थूलसूक्ष्मे यतोऽतो-
ऽत्राधाराधेयभावादितरतरभवोऽन्यत्र चाभ्येति दोषः।

---

१. 'णकम' घ. च पाठः।। २. 'षै' घ. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

दोषेऽत्रैकस्थितेऽप्याचरतु तदुभयोः शोधनं स्थानसंस्थे
तद्वत् तच्छोधनाद्यं यदि न परकृतावस्तुतोक्षा स्थलेऽलम्[1]।।५।।

विमर्शिनी

तच्छोधनादिकं प्रस्तौति - प्रासाद इति। इह दोषे सति प्रासादोऽर्चा च विश्वेशितुः देवस्य स्थूलसूक्ष्मे वपुषी प्रासादः स्थूलं वपुः प्रतिमासूक्ष्मं वपुरिति यतः यस्मात् अतोऽस्माद्धेतोः अत्रानयोराधाराधेयभावात् प्रासाद आधारः प्रतिमा त्वाधेयमिति व्यवस्थापितत्वाद् इतरतरभवः तयोरेकस्मिन्नुद्भूतो दोषोऽन्यत्र चाभ्येति प्राप्नोति प्रासादस्थो दोषः प्रतिमां प्राप्नोति प्रतिमास्थः प्रासादं च। अत्रानयोरेस्थितेऽपि दोषे प्रासादे प्रतिमायां वापि स्थिते दोषेऽपि तदुभयोः शोधनमाचरतु। प्रासादप्रतिमाभ्यामन्यत्र कुत्रचित् स्थाने स्थितो दोषश्चेत् किं कर्तव्यमित्यत्राह - स्थानसंस्थ इत्यादिश्लोकशेषेण। दोषे स्थानसंस्थे सति तच्छोधनाद्यं स्थानशोधनमाद्यं यथा भवति तथा तद्वत् प्रासादप्रतिमयोः शोधनमाचरतु। न यदि दोषः स्थानसंस्थो न चेत् स्थले सर्वत्र परकृतावस्तुतोक्षा इतरत्र कृतेन सम्पादितेनावस्तुतेनोक्षणमेव अलं पर्याप्तं भवति।।४।।

विवरणम्

ननु बिम्बस्य पातचलनादिरस्तु निमित्तं तत्रैव[2] देवस्य नियतसन्निधानात् क्षेत्रे मरणादीनां[3] कथं तदुपपत्तिरिति तद्दर्शयन् प्रथमं प्रायश्चित्तात् पूर्वमेव कर्तव्यं शोधनं वक्तुमारभमाणस्तद्विषयाविभागमपि करोति- प्रासादोऽर्चा चेति। इह विश्वेशितुः प्रासादोऽर्चा च स्थूलसुक्ष्मवपुषी यतः अत आधारधेयभावादत्र इतरतरभवो दोषः। अन्यत्र चाभ्येतीत्यन्वयः। इहेत्यर्चोपाधौ। नियतसन्निधाने देव इत्यर्थः। वपुर्व्यवस्था तु स्थापनासमय एव तावत्कल्पिता। तत्र प्रासादः स्थूलं वपुराधारः। बिम्बं सूक्ष्मं वपुराधेयम्। अत्रेत्यनयोर्बिम्बप्रासादयोरित्यर्थः। इतरतरभवोऽन्यतरभवः। प्रासादगत उलूकादिप्रवेशजन्यो बिम्बे प्राप्नोति। बिम्बगतश्च चलनतादिजन्यः प्रासादे चोरादिभिर्बिम्बस्पर्शजन्यस्य[4] तूभयत्रापि साक्षात् सम्भवः। एतच्च न्यायप्रदर्शनम्। तेनैतदपि सिध्यति। क्षेत्रप्रासादयोराश्रयाश्रयितया

---

१. 'लम्।। सद्यः शवादिसमशेषमपास्य तत्र संमार्जनादिषु कृतेषु यथोपपत्ति। संक्षालने प्रथमतो बहुवारिभिर्वा स्नानादिकृद् गुरुवरः खननादि कुर्यात्।। ख' क. ग. घ. पाठः। २. 'व स्यात् नि' क पाठः। ३. 'नामपि क' क पाठः। ४. 'दिबिम्ब',

Shripuram Publications
www.shripuram.org

व्याप्यव्यापकतया वाधारधेयभावादत्राप्यन्यतरभवो दोषोऽन्यत्र[1]चाभ्येतीति व्याप्तिरपि च स्थापनासमय एव कल्पिता। यथोक्तं ब्रह्माध्वेद्धचितादिनेत्यादि। विश्वेशितु-ग्रहणमप्येतदभिप्रायम्। तथैव चोक्तं- अखिलं काण्डमित्यादि। दोषेऽत्रैकस्थितेऽप्याचरतु तदुभयोः शोधनमिति। दोषशब्देन निमित्तं विवक्षितम्। यद्वा प्रत्यक्षदोषाभिप्रायमेतत्। यत्र निमित्तं तत्र दोषः प्रत्यक्षः इतरत्र परोक्ष इति तदिति तस्माद्यथोदीरिताद्धेतोरित्यर्थः। द्वयोरपि स्थिते दोषे द्वयोः शोधनं तावत् कार्यमेवेत्यपिशब्दाभिप्रायः। स्थान संस्थे तद्वत्तच्छोधनाद्यमिति। दोष इत्यनुषङ्गः। तद्वदिति बिम्बप्रासादयोरुभयोश्शोधनमिति दृश्यते। तच्छोधनाद्यमिति[2]। स्थानशुद्धिरपि पूर्वं कार्येत्यर्थः। आद्यपदेन क्रमः प्रदर्शितः बिम्बप्रासादयोस्तावत् प्रासादशुद्ध्यनन्तरं बिम्बशुद्धिः स्थानप्रासादादिषु स्थानशुद्ध्यनन्तरं प्रासादादिशुद्धिरिति प्रासादेऽपि स्थानत्वाविशेषादेतत्सम्भवः। य[3]दा स्थाने परोक्षो दोषः तदा विशेषमाह - यदि नेति। यदि स्थानसंस्थो नास्ति दोषः किन्तु प्रासादे बिम्ब एव वा प्रत्यक्षो दोषस्तत्सम्बन्धात् स्थानेऽपि परोक्षतया प्राप्त इत्यर्थः। तदा परकृतावस्नुतोक्षा बिम्बाभिषेकादिसम्पादि- तावस्नावप्रोक्षणं स्थले शुद्धये पर्याप्तमिति। अत्र मार्जनादि सर्वं प्रासादशुद्ध्यवसर एव स्थानेऽपि यथासम्भवं कार्यम्। स्थानशुद्धिसम्भवे तु तदा मार्जनादि क्रियते। वक्ष्यति च - 'स्थानं विशोधये'ति।।५।।

खननं हरणं दाहः पुरणं गोनिवासनम्।
विप्रोच्छिष्टं च गव्यं च सप्तैताः स्थानशुद्धयः।। ६।।

विमर्शिनी

स्थानशुद्धिं क्रमेणादिशति- खननमिति। एताः सप्त स्थानशुद्धयः स्युः।।६।।

विवरणम्

बिम्बशुद्धिषु तु तत्तदवशेषेण पारिषदानामपि शुद्धिरिष्यते इति लौकिकशुद्धि-पूर्विकैवेयं शास्त्रीया शुद्धिः स्यादित्याह- सद्य* इति। सम्मार्जनादिष्विति स्थानाभिप्रायम्। प्रथमतः कृतेष्विति सम्बन्धः। यथोपपत्तीति गन्धलेपक्षयकरमित्याद्युपपत्तिः अभिप्रेतः। संक्षालन इति बिम्बपीठाभिप्रायम्। कृतशब्दोऽनुवर्तनीयः। कदाचित् प्रासादतलादिष्वप्येतत् सम्भव इति सामान्येनैतदभिधानम्।।

१. 'चाप्यस्तीति' क पाठः। २. 'ति। प्रासा' क पाठः। ३. 'था' च पाठः। * 'सद्यः शवादिक'मित्याद्यधिकपाठमवलमवलम्भ्य प्रवृत्तेयं व्याख्या।

Shripuram Publications www.shripuram.org

इदानीं स्थानशुद्धिं विभजते- खननमिति। सप्तैता इति। अत्रायमाशयः-

"लेपमात्रे विडा[1]दीनां स्थाने सप्तैव शुद्धयः।
पतितादिषु सर्वा[2]स्स्युर्महत्यो लेपभूमनि।।
प्रसवे नरपश्वादेर्मरणे पुष्पितादिभिः।
चण्डालाद्यैश्च शयिते तद्वद्दाहादिषु त्वपि।।"

इति। सामान्यतो विण्मूत्रासृगादीनां लेपमात्रे खननाद्यास्सप्तैव स्थान[3]शुद्धयः स्युः। पतितादिसम्बन्धितया विण्मूत्राद्यवधृता वक्ष्यमाणाः सर्वा अपि कार्याः। विण्मूत्रादीनां भुम्ना लेपे तु महत्य एताः स्युः। यथा धनुर्मात्रं खननं दण्डमात्रं खननमिति। पुष्पिता रजस्वला। आदिशब्देन सूतिकादाहकादिग्रहणम्। तद्वदिति सर्वा अपीत्यर्थः।।६।।

खदिरकृतखनित्रेणास्त्रमन्त्रेण खात्वा
निर्ऋतिदिशि बहिस्तत्पांसुजातं निरस्य।
दहतु हुतभुजा दर्भादिना भस्म हृत्वा-
प्लुतयतु पशुभूत्रब्रह्मपादोदगव्यैः।।७।।

विमर्शिनी

एताः क्रमेण विवृणोति- खदिरेति। खदिरेण कृतेन खनित्रेण खननसाधनेनास्त्रमन्त्रेणाशुद्धस्थलं यथादोषं खात्वा बहिर्निर्ऋतिदिशि तत्पांसुजातं दोषयुक्तं पांसुपटलं निरस्य दर्भादिना तद्गर्ते दर्भसमित्कुशादिकं निक्षिप्यास्त्रमन्त्रेण हुतभुजा अग्निना तत्स्थलं दहतु। तद्भस्म हृत्वा त्यक्त्वा पशुभूत्रब्रह्मपादोदगव्यैः गोमूत्रैर्ब्राह्मणपादोदकैः पञ्चगव्यैश्च आप्लुतयतु आप्लुतं करोतु।।७।।

विवरणम्

दाहस्सोपानमण्डपादीनां उत्क[4]ाशन्यादिभिर्दाह इति यथोप[5]देशं विवृणोति- खदिरकृतखनित्रेणेत्यादि। देहशुद्ध्यादिसर्वमिहार्थसिद्धम्। खनित्रादिसाधनजातम् औचित्यादादित एव संस्करणीयम्। खात्वेति। यत्र स्थाने शवलेपादि सम्भूतं तत् स्थलम् अरत्निजानुपुरुषादिप्रमाणं दोषभेदानुसारतः समन्ततोऽधश्च खननीयम्। मृण्मये

१. 'पीठदी' क पाठः। २. 'र्वासु' क पाठः। ३. 'ने' घ. च पाठः। ४. 'त्कादि' क पाठः। ५. 'थोद्देशं' घ. च पाठः।

Shripuram Publication www.shripuram.org

स्थाने खननसम्भवः। शिलामये तु जलमापूर्योद्धर्षणं कार्यम्। निर्ऋतिदिशीति प्रकारबाह्यतोऽपि नैर्ऋतभागे दूरतो निर्हरणभुक्तम्। सर्वत्रास्त्रमन्त्रोऽनुवर्तनीयः। शिलामये[1] तु तन्मलमयं जलं निर्हरणीयम्। बलिपीठादिस्थानेष्वेतत्सम्भवे तत्प्रतिष्ठित्यविरोधेन सर्वं कार्यम्। हुतभुजेत्यग्निः। दर्भादिनेति यथाद्वयोगं पलाशपयोद्रुमादिग्रहणम्। भस्म हृत्वेति। दग्धपांसुमिश्रितभस्मापनयमुक्तम्। पूर्ववन्निर्ऋतिभाग एवैतदिष्यते। प्लुतयत्विति गोमूत्रेण ब्राह्मणपादावनेजनजलेन पञ्चगव्येन च तत्स्थलं सर्वं क्लिन्नं करोत्वित्यर्थः।।७।।

कौशादिमृद्भिरभिपूर्य विलोड्य दार्ढ्य-
मापाद्य हस्तिचरणैरथ गा निवास्य।
स्थानं विशोध्य परिकल्पितमण्डपेऽत्र
सम्भोजयेद् द्विजवरान् सघृतं पयोन्नम्।।८।।

विमर्शिनी

कौशादिमृद्भिः कुशदर्भादिस्थानाद् गृहीताभिर्मृद्भिस्तद्गर्तमभिपूर्य विलोड्य शुद्धैर्जलैरार्द्रीकृत्य हस्तिचरणैर्गजपादाकारैः पालाशादिकाष्ठविशेषैः दार्ढ्यं स्थैर्यमापाद्याथ गाः धेनुर्निवास्य पुनस्तत्स्थानं विशोध्य परिकल्पितमण्डपे मण्डपाकारेण चतुर्दिशमावृत्यात्र द्विजवरान् आभिजात्यविद्यातपोयुक्तान् ब्राह्मणश्रेष्ठान् सघृतं पयोन्नं संभोजयेद् इच्छाभोजनं कुर्यात्।।८।।

विवरणम्

कौशादिमृद्भिरभिपूर्येति। कुशमूलक्षेत्रनदीपर्वतवल्मीकाग्न्यायतनतीर्थगोनिवासह्रद-सामान्यमृद्भिर्यथायोगं पूर्वप्रमाणमभिपूर्येत्यर्थः। हस्तिचरणैर्दार्ढ्यमापाद्येत्यन्वयः। गा निवास्येति यवसादिदानेन तत्र बह्वीर्गाः याममात्रं निवासयेदित्यर्थः। दोषगौरत्रेऽपि समानमेतत्। तद्दिन एव धारापर्यन्तानुष्ठानविधानादिति स्थानं विशोध्येति। मार्जना[2]लेपनमात्रं मार्जनादिधूपदीपादि सर्वं वाभिप्रेतम्। संभोजयेदित्युच्छिष्टस्पर्शनोपाय एवायमवगन्तव्यः। यत्र स्थले भोजनमसाधनीयं तत्र त्वन्यत्र भोजयित्वोच्छिष्टमानीय स्पर्शयितव्यम्। प्रासादान्तर्भागेऽपि समानप्रेतत्।।८।।

---

१. 'लातले तु' च पाठः। २. 'नमाले' क पाठः।

Shripuram Publications
www.shripuram.org

**उच्छिष्टमुद्धृत्य विशोध्य भूमिं
गव्येन सिञ्चेद् विकिरैः किरेच्च।**

**मूलेन तत्राष्टदले सरोजे
देवं यथावत्[1] परिपूजयेच्च॥९॥**

विमर्शिनी

उच्छिष्टमुद्धृत्य भुमिं विशोध्य गव्येन सिञ्चेत्। विकिरैश्च किरेत्। अष्टदले सरोजे अष्टदलपीठादियुक्तं पद्मं कृत्वा तत्र मूलेन देवमावाह्य यथावत् परिपूजयेच्च॥९॥

विवरणम्

विधिज्ञ इति विकल्पतस्समुच्चयतो वास्तुपूजाप्युक्त। देशव्याप्तिजुषो मूलबिम्बचैतन्यस्याप्यायनार्थं पूजनमित्यापि सूचितम् इति॥९॥

**[2]दोषे सति स्थानगतेऽस्य शुद्धिं
कृत्वेति सूत्रत्रयवेष्टनाद्याम्।**

**प्रासादशुद्धिं प्रविधाय पुण्या-
हान्तां विदध्यादथ बिम्बशुद्धिम्॥१०॥**

विमर्शिनी

दोषे स्थानगते सति अस्य स्थानस्य शुद्धिम् इति उक्तप्रकारेण कृत्वा तत्र सूत्रत्रयवेष्टनाद्यां पुण्याहान्तं प्रासादशुद्धिं तृतीयपटले[3] प्रोक्तक्रमेण प्रविधायाथ बिम्बशुद्धिं विदध्यात्॥१०॥

विवरणम्

स्थानं विशोध्येतीति। बीजवापका[4]लविधानार्थमुक्तस्थानशुद्ध्यनुवादः। यथार्हमिति कलशाल्पत्वे नैतत् कर्तव्यम्। कलशभूयस्त्वे तु कर्तव्यमित्यर्थः। तदुक्तम्-

"मङ्गलाङ्कुरसंयुक्तं साधिवासनमेव च।

स्नपन"मिति। यद्वा यथार्हमिति पञ्चाहसप्ताहाद्यभिप्रायम्। तत्र धारावगाहादिदिवसभूयस्त्वे

---

१. 'विधिज्ञः प' क. ग पाठः। २. 'स्थानं विशोध्येति यथार्हमुप्तबीजोऽथ सु' क. ग. घ पाठः। ३. 'ल' ख. ग. घ. ङ. च पाठः। ४. 'कवि' क पाठः।

Shripuram Publications
www.shripuram.org

बिम्बशुद्धिमध्ये बीजावापः[1] स्यादिति। यद्वा यथार्ह प्रासादशुद्धिमित्यन्वयः। प्रासादस्योपस्पर्शनादौ पञ्चगव्यप्रोक्षणमात्रम्। साक्षात् स्पर्शे विण्मुत्रादिलेपसम्भवे च प्रभूतपञ्चगव्यसमुक्षणमिति।।१०।।

क्षालनप्लावनस्नानमार्जनानि यथाक्रमम्।
धारावगाहसेकाश्च सप्तैता बिम्बशुद्धयः।।११।।

विमर्शिनी

बिम्बशुद्धिरुद्दिशति- क्षालनेति। क्षालनप्लावनस्नानमार्जनानि चत्वारि, धारावगाहसेकास्त्रयः सेकः पञ्चस्नानम् एताः सप्त यथाक्रमं बिम्बशुद्धयो भवन्ति।।११।।

विवरणम्

बिम्बशुद्धिं विभजते- क्षालनेति। क्षालनादिचतुश्शुद्धिनां समासेऽयमाशयः। तेषां पृथक् पूजापक्षेऽपि धारादिवत् नानाविधानं मा भुदिति। सप्तैता[2] इति। अत्रायमाशयः सकलदोषेषु सप्तैव शुद्धयो लेपादिषु तु शुद्ध्यन्तरमपि कार्यमिति। वक्ष्यति च लेपादौ त्वित्यादि। किञ्च-

"सर्वेष्वपीह दोषेषु सप्त सामान्यशुद्धयः।
बिम्बे समाधिशुद्धिश्चापीष्यते दोषभूमनि।।
दुर्जनश्चादिविण्मूत्रशवादिस्पर्शने तथा।
क्षुद्रमन्त्रादिसंसर्गे महत्य इह शुद्धयः।।"

इति। दोषभूमनीति। पतितप्रवेशदुष्टनैवेद्यनिवेदनादिषु समाधिशुद्धिः भुतसंहारादिलक्षणा। वक्ष्यति च- 'कृत्वा शुद्धिमिहावगाहचरमामि'त्यादि। दुर्जनाश्चण्डालपतितचोरादयः। श्चादयः च सृगालकाकोलूकराजिलादयः। विण्मूत्रादीनि प्रागुक्तानि। क्षुद्रमन्त्रादयः क्षपणमन्त्रो भिन्नदेवतामन्त्रः। मरिचमाहिषादिः प्रतिषिद्धपुष्पमित्येवंप्रभृयः महत्य इति। यथा वक्ष्यति- 'दोषे भूयसो'त्यादि इति।।११।।

पात्रं पीठसमर्चनाद्युदितक्लृप्त्या दर्भमृत्त्वग्जलै-
रेकं साक्षतगन्धपुष्पसलिलैर्न्यक्कूर्चकं चापरम्।

१. 'ज' घ. च पाठः। २. 'ता उत्तरत्रा' क पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

अन्यत् कूर्चयुतं हिरण्यफलयुक्तैस्तैः पिधानान्वितं
तुर्यं चापि तथा प्रपूर्य मनुवित् प्राच्र्य प्रसाध्याग्रतः ।।१२ ।।

तूष्णीं दर्भमृदादिभिः प्रथमतः सङ्धृष्य संक्षाल्य तद्
बिम्बं पीठयुतं द्वितीयसलिलैराप्लाव्य चामन्त्रतः ।

संस्नाप्य स्नापने तृतीयसलिलैः शान्तिं स्मरन्[1] मन्त्रतः
कूर्चाग्रैर्विधिवत् प्रमार्ज्य च तुरीयैर्देवमभ्यर्चयेत् ।।१३ ।।

विमर्शिनी

ता बिम्बशुद्धीर्विवृणोति- पात्रमिति । मनुवित् क्षालनादिचतुश्शुद्धौ मन्त्रसम्बन्धं क्रमेण योजयेत् । गुरुरग्रतो देवस्याग्रभागे पीठसमर्चनाद्युदितक्लृप्त्या[2] प्रत्येकं पीठपूजापात्र-शोधनादिक्लृप्त्या चतुर्षु मध्ये एकमग्निकोणस्थितं, न्यक्कूर्चकमिति सर्वत्र सम्बध्यते, दर्भमृत्त्वग्जलैः दर्भशकलैर्वल्मीकमृदा क्षीरिद्रुमत्वग्भिर्जलैश्च, अपरं निरृतिकोणस्थितं पात्रं साक्षतगन्धपुष्पसलिलैश्च, अन्यद् वायुकोणगतं कूर्चयुतम् अपरेणापि कूर्चेण युतं हिरण्यफलयुक्तैः साक्षतगन्धपुष्पसलिलैश्च, तुर्यं चतुर्थम् ईशकोणगतं तैरुक्तैर्द्रव्यैः पिधानान्वितं चापि तथा क्रमेण प्रपूर्य प्राच्र्य प्रसाध्य सम्पाद्य प्रथमतः प्रथमद्रव्यैर्दर्भमृदादिभिः तूष्णीं मन्त्रसम्बन्धं विना पीठयुतं तद् बिम्बं संघृष्य संक्षाल्य द्वितीयसलिलैश्चामन्त्रत आप्लाव्य स्नपने स्नानकाले शान्तिं स्मरन् मन्त्रतः संस्नाप्य तुरीयैश्च कूर्चाग्रैर्विधिवत्

---

१. 'तु ।।

दोषे भुयसि मुष्टिभिस्तु तिसृभिर्वल्मीकतीर्थाकर-
क्ष्माभृन्मृद्भिरहार्यवारमिह तूष्णीं क्ष्रौं निजास्त्रेण च ।
पिष्टैर्दुग्धतरुत्वचामपि विघृष्यार्चां पृथक् क्षालयेत्
तत्तोयैर्मतिमानधोर इह शर्वादौ नृसिंहास्पदे ।।
पूर्णं प्रोक्तनयेन शान्त्युपनिषन्मुलैर्महत्पात्रमि-
ष्ट्वावर्त्याष्टशतं च बिम्बममुना मन्त्रं परिप्लावयेत् ।
तैरेव स्नपयेदतो वसुशतं पात्रान्तरेणाणुभिः
प्रोक्षेते तैः क्रमविद् गुरुः सपवमानाब्लिङ्गहोत्रादिभिः ।।

ऐ' क, 'तु ।। ऐ' घ. पाठः । २. 'चि' ख. घ. च. पाठः ।

www.shripuram.org
Shripuram Publications
www.shripuram.org

प्रमार्ज्य प्रोक्ष्य देवमभ्यर्चयेत्। प्रत्येकं देवं पूजयोदिति केचित्।।१२-१३।।

विवरणम्

यथोद्देशं विवृणोति- पात्र इत्यादि। अग्रत एकं पात्रं दर्भमृत्त्वग्जलैः अपरं गन्धपुष्पसलिलैर्हिरण्यफलयुक्तैस्तैः अन्यत्। तथा तुर्यञ्च प्रपूर्य प्रार्च्य प्रसाध्येत्यन्वयः। उत्तरश्लोकेन च सम्बन्धः। अत्राग्रत इति चतुर्णां पात्राणां सम्पादने देश उक्ताः। प्रासादान्तरेव बिम्बाग्रतस्तल[1] इति। पात्रमिति स्थाल्यादिभाजनमुक्तम्। केचित्तु स्नाने कुम्भमभ्युपयन्ति मार्जनेऽपि चा[2]पदे कलशजलसम्प्रोक्षणादिषु तथा दर्शनादिति दर्भमृत्त्वग्जलैरिति। प्रपूर्येति सम्बन्धः। दर्भशब्देनेह भाव्युद्ध[3]र्षणविनियोगोपपत्त्या मुष्टीकृत-दर्भनिचयग्रहणम्। तदुक्तम्-

"एकविंशतिदर्भैस्तु कृत्वा मुष्टित्रयं पुनः।"

इति। मृदः सामान्याद् वल्मीकमृदः त्वचश्च क्षीरिवृक्षाणां त्वचः। यद्वा बिम्बशुद्ध्यादिप्रकरण (मता? तो) मृत्त्वक्परिग्रहः हिरण्यफलयुक्तैस्तैः प्रपूर्येति साक्षतगन्धपुष्पसलिलैरित्येतस्य ग्रहणम्। तथेति पूर्ववत् साक्षतगन्धपुष्पसलिलैर्हिरण्य-फलयुक्तैः प्रपूर्य इत्यर्थः। न्यक्कूर्चञ्चेत्यपरमित्यस्य विशेषणम्। तेन क्षाळनीये कूर्चाभावः न्यक्कूर्चकमित्येतत् स्नानीये[4] मार्जनीयेऽप्यनुवर्तनीयम्। कुर्चयुतमित्येतदन्यदित्यस्य विशेषणम्। पिधानान्वितमिति तुर्यविशेषणम्। पात्रान्तरेण पिधानमपि कार्यमित्यर्थः। कुम्भपक्षे तु च[5]क्रिकैव पिधानं भवति[6]। पठिसमर्चनाद्यु[7]दितक्लृप्त्येति सर्वसामान्येनोक्तम्। प्रपूर्य प्रार्च्य प्रसाध्येति च सम्बन्धः। पीठे समर्चनादिरुदि[8]ता क्लृप्तिरिति समासः। पीठसमर्चनं पात्रसंसादनं पात्रसंस्कारः तत्र पूजा पुनरभिमान्त्रणमित्येतत् सर्वमिहाभि-प्रेतम्।।१२।।

तूष्णीममन्त्रतः शान्तिं मन्त्रतः स्मरन् विधिवत् मन्त्रतः प्रमार्ज्येति। यथास्वं भावि विनियोगानुसृतिरुचितपदेन विवक्षिता। अयमाशयः क्षालनीयं तावत् तूष्णिं सम्पादनीयम्। प्लावनीयममन्त्रतः स्मरणेन सम्पाद्यम्। स्नानीयं मन्त्रमात्रेण। मार्जनीयं तु प्रसिद्धरीत्येति। मनुविदित्यर्थात् स्नानीयादिविषयम्। तत्र स्नानीये मूलं शन्नोदेवीरिति

१. 'स्थ' क पाठः। २. 'चाद्यौ क' घ. च पाठः। ३. 'त्क' क पाठः। ४. 'येऽप्य' क पाठः। ५. 'ण्डि' च पाठः। ६. 'तीति' क पाठः। ७, ८. 'चि' घ. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

वा मन्त्रः। मार्जनीये शान्तिपञ्चतत्त्व[1]मूलानि। मन्त्रैः प्रपूज्य चेति दर्शनादिति। इह तूष्णीममन्त्रत इत्यत्रास्त्रप्रोक्षणादि सर्वं कार्यमेव। प्लावनीये मूलमूर्तेश्शान्तेर्वा स्मरणमित्यापि मन्त्रविदिति सूचितम्। एतञ्च साधनचतुष्टयं तत्तस्नानसमये बिम्बाग्रतः सम्पादनीयम्। प्रातिपादनसौकर्यादेवमभिधानमिति। एवमिह प्रयोगः। देवस्य स्नानावधि विधायाग्रतस्[2]तलं विशोध्य तत्र दर्भान् विकीर्य वा स्वस्तिके धान्यपीठं कृत्वा केवलां[3] वा सूत्रादिसंस्कृतां वा स्थलीं न्यग्विलं संसाद्य तूष्णीं पीठं सकृदिष्ट्वास्त्र[4]प्रोक्षणादि विधाय प्रणवेन प्रोक्ष्यास्त्रोक्षितमुष्ट्यादित्रयं प्रात्रे विन्यस्य जलेन सम्पूर्य तूष्णीं[5] पूजयेते। तेन च क्षालनं कृत्वा देवं पूजयेत्। प्लावनेऽपि समष्टिमन्त्रं स्मरन् पीठमिष्ट्वा पात्रसंस्कारनन्तर[6]भधोऽग्रकूर्चं निक्षिप्य गन्धपुष्पाक्षतान्यपि निक्षिप्य सम्पूर्य चक्रिकादियुक्ते मूलं शान्तिं वा तन्मन्त्रस्मरणं स्मरन्नावाहनादि विधाय सकृदिष्ट्वाभिमन्त्र्य तेन प्लावनं विदध्यात्। एवं स्नानेऽपि। मन्त्रोच्चारणन्तु विशेषः मार्जनीये तु विधिवत् पीठपूजादि कार्यमिति। अथवा अग्रत इति काल उक्तः। चतुश्शुध्यनुष्ठानात् प्रागेवेति मुखमण्डपादौ देशे साधनचतुष्टयं प्रथमं सम्पाद्यान्तः प्रविश्य तेन क्षालनादि विदध्यादित्यभिप्रायः।

"दक्षिणोत्तरतः कुर्यात् क्रमात् पदचतुष्टयम्।
तेषु वा क्षालनीयादिचतुर्द्रव्याणि कल्पयेत्।।
चतुरश्रं चतुष्कोष्टं कृत्वाग्न्यादिपदेषु वा।
पञ्चकस्य पदेष्वैन्द्र्यादिषु वा मध्यमं विना।।"

इति। तूष्णीमिति। इह प्रथमत इति निर्देशौचित्यात्तत इत्यध्यहियते। प्रथमतः स्नपने तद्बिम्बं दर्भादिभिः तूष्णीं संघृष्य संक्षाल्य ततः द्वितीयसलिलैरमन्त्रत आप्लाव्य च ततस्तृतीयसलिलैश्शान्तिं स्मरन् मन्त्रत आप्लाव्य च ततः तुरीयैर्विधिवत् कूर्चाग्रैः प्रमार्ज्य च देवमभ्यर्चयेदिति। अत्र ल्यबन्तानां देवमभ्यर्चयेदिति सम्बन्धः[7]। स्नपने इति च सर्वत्रानुवर्तते। प्रयोगधर्मवदिह पूजाधर्मोऽवबोद्धव्यः। क्षालने तावत् तूष्णीं पीठं सकृतिष्ट्वा तूष्णीमावह्य व्यापकाद्यपि कृत्वार्घ्यादि दत्त्वा तू[8]ष्णीं क्षालनं कृत्वा तूष्णीं सकृदिष्ट्वा तू[9]ष्णीन्निवेद्य सकृत्तथेष्ट्वावसानीयार्घ्यं समर्प्य तूष्णीमेव व्यापकादि विदध्यात्। प्लावने मन्त्रस्मरणं विशेषः। स्नाने मन्त्रमात्रोच्चारणम्। मार्जनेतु प्रसिद्धरीत्या

---

१. 'त्त्वानि मू' २. 'स्थ' ३. 'लं' क पाठः। ४. 'स्त्रेण प्रो' च पाठः। ५. 'ष्णीं संपू' च पाठः। ६. 'मग्र' क, 'मधो' घ पाठः। ७. 'न्धः। इति। स्त्र' क पाठः। ८. 'ष्णीं स' क पाठः। ९. 'ष्णीमेव निवे' घ. च पाठः।

Shripuram Publications
www.shripuram.org

पूजा स्यात्। किन्तु नित्यपूजावन्न्यासोपचारविस्तारो न कार्यः। तदुक्तं- 'घारान्ते पूजयेद्देव'-मिति। शान्तिं स्मरन् संस्नाप्येति प्रतिपात्तिरुक्ता। स्नपनसमये तदुदकगतशान्तिचिद्व्याप्तिं बिम्बे तद्दोषप्रशमनीं स्मरेदिति प्रदर्शनार्थमेतत् क्षालनादिष्वप्यविशेषादिति। द्वितीयसलिलैरति द्वितीयोपदिष्टसलिलैः एवं तृतीयसलिलैस्तुरीय[1]सलिलैरिति[2] प्रमार्ज्य चेति चतुर्भिर्मूर्तिपैस्सह पुण्याहप्रसिद्धैर्मन्त्रैः प्रमार्ज्य शेषेण पूजितमन्त्रैः स्नपनमुक्तम्। अथ यदाग्रत इति काल उक्तः तदोपदेशक्रमेणैव प्रयोगः। प्रथमत इति पीठपूजातोऽपि पूर्वमिति प्लावने कृत एव पीठपूजापीत्यर्थः। अत एव स्नपने सं[3]स्नाप्येति वचनम्।।१३।।

आप्यैश्च पावमानैश्च होतृभिश्चेह मार्जनम्।
कुर्वीत सर्वदेवेषु ब्रह्मभिश्चापि शूलिनि।।१४।।

विमर्शिनी

इह मार्जने सर्वदेषु आप्यैः 'आपो हि ष्ठे'त्यादिभिः, पावमानैः 'स्वादिष्ठये'त्यादिभिः होतृभिः 'चित्तिस्त्रुगा'दिभिश्च मार्जनं कुर्वित। शूलिनि एतैः पञ्चभिर्ब्रह्मभिश्चापि।।१४।।

विवरणम्

इदानीं दोषभूयस्त्वे चतुश्शुद्धिषु विशेषमाह-। *दोषे भूयसीति। मतिमानित्यनेनैतत् सूचितम्। पृथक् पात्रेषु मुष्टिमृत्त्वक्सम्पादनं प्रत्येकं त्रिधा विभक्तेषु तूष्णीन्नरसिंहबीज[4]सुदर्शनैः पूजनाभिमन्त्रणमिति सर्वं सूचितम्। आकरः क्षेत्रं क्ष्माभृत् पर्वतः। अहार्यवारं पर्वतसंख्यावारम्। सप्तवारमिति यावत्। प्रथमम्[5]मुष्ट्या तूष्णीं सप्तवारमुद्घृष्य द्वितियमुष्ट्या तथा क्ष्रौंबीजेन तृतीयमुष्ट्या तथा सुदर्शनेन चोद्घृष्य तत्पात्रतोयेन क्षालयेत्। एवं मृद्भिस्त्वग्भिरपीति। शर्वादाविति। शिवस्कन्दगणपतिषु।।

पूर्णमिति। प्रोक्तनयेन पूर्णं महत् पात्रं शान्त्युपनिषन्मूलैरिष्ट्वेत्यन्वयः। साक्षतगन्ध-पुष्पसलिलैर्न्यक्कुर्चकञ्चेति प्रागुक्ता प्रक्रिया। शन्नोदेवीरिति शान्तिमन्त्रः पञ्चोपनिषदः पञ्चतत्त्वानि शिवे तु पञ्चब्रह्माणि अमन्त्रमिति पूर्ववदनुच्चारणम्। तैरेवेति। अतः प्रात्रान्तरेण तैरेवाणुभिर्वसुशतं स्नपयेदित्यन्वयः। अत इत्युक्तविधान्महतः प्रात्रादित्यर्थः। पञ्चमीनिर्देशादाहृत्याहृत्य स्नपयेदिति लभ्यते। तैरिति शान्त्युपनिषन्मूलग्रहणं प्रोक्षेदित्यत्रात

१. 'यैरि' घ. च पाठः। २. 'ति। विधिवत् प्र' घ. च पाठः। ३. 'स्थ' क पाठः। * अधिकपाठमवलम्ब्य प्रवृत्तेयं व्याख्या। ४. 'ज पूजनादिभिः म' क पाठः। ५. 'मं' च पाठः।

Shripuram Publications
www.shripuram.org

इत्यनुषङ्गः। पूर्ववदित्यर्थः। तैरिति शान्त्युपनिषन्मूलैः। क्रमविदित्यस्यायमभिप्रायः। प्रथमं शान्त्युपनिषन्मूलैः पुनः पुण्याहपठितक्रमेणाब्लिङ्गाभिः पावमानीभिः शुद्ध्यायुष्मतीभिरपि पूनश्चित्तिस्रुगादिभि[1]रवसानेऽपि शान्त्युपनिषन्मूल[2]मन्त्रैः प्रोक्ष्य तैश्शेषेण स्नपयेदिति।।१४।।

ऐशान्यां धान्यराशौ [3]हरिति सुमहिते [4]योगपीठे कटाहं
लौहं संसाद्य संस्कृत्य च तदनु समुत्तानितेऽधोग्रकूर्चम्।
विन्यस्यापूर्य वारा नव[5]पटपरिपूतेन मन्त्री जलेऽस्मिन्
विन्यस्येन्मत्स्ययुग्मं कमठयुगमपि स्वर्णदुर्वर्णक्लृप्ते।।१५।।

विमर्शिनी

चतुश्शुद्ध्यनन्तरमेव धारा कुर्यादित्याह- ऐशान्यामिति। देवस्य ऐशान्यां हरिति दिशि धान्यराशौ सुमहिते पूजिते योकपीठे लौहं लोहमयं कटाहं संसाद्य संस्कृत्य तदनु समुत्तानिते अघोऽग्रकूर्चं विन्यस्य नवपटपरिपूतेन नवीनवस्त्रगालितेन वारा जलेनापूर्यास्मिन् जले स्वर्णदुर्वर्णक्लृप्ते सुवर्णेन रजतेन च क्लृप्ते मत्स्ययुग्मं कमठयुगमपि विन्यस्येत्।।१५।।

विवरणम्

अथ धारां प्रस्तौति- ऐशान्यामिति। हरिच्छब्दो दिग्वचनः। स्वस्तिकेऽष्टदले वा पीठक्लृप्तिः। स्वे विष्टर इति। वरुणमात्रपूजायां वारुणं पीठमन्यत्र तत्तत् पीठमिति भावः। संस्कृत्य चेत्यस्त्रप्रोक्षणादिसंस्कारा उक्ताः। नवपटपरि[6]पूतेन वारेति। नववस्त्रेण तस्मिन्नेव वा पात्रान्तरे वा गालितेन जलेनेत्यर्थः। मन्त्रीति वारुणमन्त्रविदिति पात्रेऽपि वारुणपूजनमुक्तम्। वक्ष्यति च वारुणमन्त्रपात्रमिति मत्स्ययुग्मं मत्स्यमिथुनं, कमठयुग्मं कूर्ममिथुनं, स्वर्णदुर्वर्णक्लृप्ते इति मिथुनद्वयविशेषणम्। द्विवचनं सुवर्णकृतं मत्स्यद्वयं रजतकृतं कूर्मद्वयम्। यद्वा सुवर्णकृतं तयोः पुरुषद्वयं रजतकृतं तयोः स्त्रिद्वयमिति वार्थः।।१५।।

---

१. 'रप्यव' क पाठः। २. 'लैः प्रो' घ. च पाठः। ३. 'दिशि महितमहायो' ख पाठः। ४. 'विष्टरे स्वे क' क. ग. घ पाठः। ५. 'वविमलपटिगालितेनोदकेऽस्मिन्' ख पाठः। ६. 'पूरिते' क.।

Shripuram Publications
www.shripuram.org

पद्मिनीं ससुमनोमृणालिनीं न्यस्य तत्र वरुणं सतीर्थकम्।
प्रार्च्य देवमपि सन्निधाप्य तत्संस्पृशन् जपतु वारुणादिकम्।।१६।।

विमर्शिनी

तत्र ससुमनोमृणालिनीं पुष्पपत्रमृणालवतीं पद्मिनीं न्यस्य सतीर्थकं वरुणमावाह्य प्रार्च्य देवमपि सन्निधाप्य सम्पूज्य तत् पात्रं संस्पृशन् मन्त्री पञ्चवारुणादिमन्त्रज्ञः वारुणादिकम् 'अवते हेलः' 'उदुत्तमं वरुण' 'इमं मे वरुण' 'तत्त्वायामि' 'त्वन्नो अग्ने' इति पञ्चवारुणम् आदिशब्देन 'प्रसुव आप' इत्यादि सूक्तं च जपतु।।१६।।

विवरणम्

पद्मिनी पद्ममेव। ससुमनोमृणालिनीं पुष्पमृणालसंयुक्तां कन्दोपलक्षणमेतत्। जलाधिवासोक्तैव पूजा स्यात्। देवमपि सन्निधाप्येति सन्निधापनमात्रमुक्तम्। यद्वात्रापि संक्षेपेण[१] एव पूजेष्यते। वारुणादिकमिति पञ्चवारुणपञ्चतत्त्वमूलाद्यभिमन्त्रणमुक्तम्। तदुक्तं-

"अब्लिङ्गैर्वारुणीभिश्च हिरण्यवर्णाभिरेव च।
यजुष्पवित्रसावित्रि ब्रह्मव्याहृतिभिः क्रमात्।।"

इति।।१६।।

पालाशादित्रिपदकलितं लोहजं हेमरन्ध्रं
धारापात्रं स्नपनसमयेऽधोग्रकूर्चं प्रकल्प्य।
पादानिष्ट्वा प्रणवलिपिभिस्तेन पात्रं च कूर्चं
चास्मिन् पात्रे न्यसतु[२] च पूनर्गन्धपुष्पाक्षतानी।।१७।।

विमर्शिनी

पुनर्देवस्य पीठपूजापूर्वमावाह्य स्नपनसमय् पालशादित्रिपदकलितं पालाशादिया-ज्ञिकवृक्षक्लृप्तपादत्रयधृतं लोहजं लोहेन निर्मितं हेमरन्ध्रं हेम्ना कल्पितरन्ध्रप्रदेशं धारापात्रधोग्रकूर्चं च प्रकल्प्य प्रणवलिपिभिः 'अं नमः' 'उं नमः' 'मं नमः' इति पादानिष्ट्वा पात्रं कूर्चं चेष्ट्वास्मिन् पात्रे गन्धपुष्पाक्षतानि च न्यसतु।।१७।।

---

१. 'ण पू' घ. च. पाठः। २.'क्षिपतु' क. ग. घ पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

पालाशादित्रिपदकलितं पालाशैर्वा क्षीरवृक्ष[१]शकलैर्वा त्रिभिः पादैः कलितं बद्धं प्रकल्प्येत्यर्थात् प्रतिमोपरिकल्पनं लभ्यते पलाशादिकृतेन सरन्ध्रेण पात्रान्तरेणार्थाद्धारापात्रमुक्तं भवति। स्नपनसमय इति। कटाहपूजानन्तरं पीठपूजावाहनादि विधाय स्नानसमय इत्यर्थः। प्रणवलिपिभिरिति प्रणवांशै[२]रं उं मं इत्येतैः तेन पात्रञ्चेति। प्रणवेन पादपात्राणामस्त्रप्रोक्षणादिकमर्थसिद्धम्। कूर्चञ्चेति। तेन प्रणवेनेत्यर्थः। क्षिपतु चेति। कलशपूरणोक्तरीत्या जीवमन्त्रयुतेन मूलेनेति भावः।।१७।।

पात्राद् वार्यथ वारुणादधिदरं [३]कृत्वाञ्चितेनामुना
तत् पात्रं परिपूर्य मूलमनूना तच्छेषतोयैरपि।
तत्कूर्चाग्रविनिर्गतामविरलां धारां समापातये-
दर्चामूर्धनि याममात्रमभिजप्यैतान् मनूंस्तन्मनाः।।१८।।

विमर्शिनी

वारुणात् पात्रात् अधिदरं शङ्खे वारि कृत्वा अञ्चितेन पूजितेनामुना मूलमनुना तच्छेषतोयैरपि तत्पात्रं परिपूर्य अर्चामूर्धनि प्रतिमाया मूर्ध्नि याममात्रं कालम् एतान् वक्ष्यमाणन् मन्त्रानभिजप्य तन्मना भूत्वा तत्कूर्चाग्रविनिर्गतां तत्कूर्चाग्रात् स्यन्दमानां धारामविरलामविच्छिन्नां समापातयेत्।।१८।।

विवरणम्

अधिदरं हृत्वेति। दरः शङ्खः तस्मिन् पात्रान्तरे[४]णाहृत्येत्यर्थः। मूलमनुनाञ्चितेनेत्यावाह्य पूजनमुक्तम्। पूरणेऽपि मूलमन्त्रः कलशपूरणोक्त एव वा। तच्छेषतोयैरपीति। कटाहतः पात्रान्तरेणाहृतैरपि सह पूरणमुक्तम्। अविरलामनल्पाम्। एतान्मनूनभिजप्येति वक्ष्यमाणमन्त्राभिप्रायम्। तन्मना इति धारायां प्रतिपत्तिरु[५]क्ता।।१८।।

मन्त्रान् पञ्च निजान् जपेयुरभितः पात्रं स्पृशन्तो द्विजाः
[६]गायत्रीं दशतारकां सकलवेदादीन् स्वकीयान्यपि।
सूक्तादीनि सपावमानपुरुषाम्नायान्ति[७]कानि क्रमा-
ज्जप्या वाखिलसंहितात्र कथितान्याद्यन्तजप्यानि च।।१९।।

---

१. 'क्षजैर्वा' घ. च पाठः। २. 'रेव उ' च पाठः। ३. 'हृ' ख पाठः। ४. 'णेत्यर्थः' क पाठः। ५. 'क्ता...नि' घ. च पाठः। ६. 'सावित्रीम्' इति मूलकोशपाठः। ७. 'दि' ख पाठः।

www.shripuram.org Shripuram Publications www.shripuram.org

विमर्शिनि

तत्काले अभितः परितः उपविश्य पात्रं दर्भैः स्पृशन्तो द्विजाः पूर्वं निजान्[1] वक्ष्यमाणान् पञ्च मन्त्रान् जपेयुः। दशतारकां गायत्रीं दशप्रणवगायत्रीमित्यर्थः। सकलवेदादीन् ऋग्यजुस्सामाथर्वणादीन् स्वकीयानि वैष्णवादीनि सूक्तादीन्यपि सपावमान-पुरुषाम्नायान्तिकानि। पावमानं 'स्वादिष्ठा'दिकम्। पुरुषसूक्तं 'सहस्रशीर्षादि'कम्। आम्नायान्तिकं 'वात आवात्वा'दिकम्। अथवा अखिलसंहिता क्रमाज्जप्या। अत्र तथाचेत् कथितानि सर्वाणि आद्यन्तजप्यानि स्युः।।१९।।

विवरणम्

निजान् पञ्च मन्त्रानिति पञ्चतत्त्वानि शिवे पञ्चब्रह्माणि। अभित इति। बिम्बं परितः। द्विजा इति गुरुर्मूतिपाश्च। दोषगौरवे यथालाभमन्ये च वेदविद इत्यर्थः। सावित्रीं दशतारकामिति। दशप्रणवागायत्रीं स्वकीयान्यपि सूक्तादीनीति[2]। स्वकीय-सूक्तादीन्युत्तरश्लोके[3] वक्ष्यते। आदिशब्देन स्वकीयानुवाकादिग्रहणम्। सपावमानपुरुषा-म्नायादिकादीनीति। पावमानं त्रिषु वेदेष्वपि प्रसिद्धम्। आदिशब्देन श्रीसूक्तशिवसङ्क-ल्पादिग्रहणम्। जप्या वाखिलसंहितेति दोषभूयस्त्वाभिप्रायम्। तदा विशेषमाह-अत्र कथितान्याद्यन्तजप्यानि चेति। प्रथमं पञ्चतत्त्वदशप्रणवगायत्रीवेदादिनिजसूक्तानि संहिताभागशः पुरुषसूक्तादीनि पञ्चतत्त्वान्तमिति भावः।।१९।।

रुद्रे कद्रुद्रपूर्वं स्वभुवि पुनरतोदेवपूर्वं द्वयं त-
च्छाङ्गींशे यातऊत्यादिकमिदमुभयं चार्यके तारकारौ।
अग्निर्होतादिकं[4] स्वं प्रजपतु गणपेऽथो गणानांपदाद्यं
रुद्रोक्तं च द्वयेऽस्मिन् महिषजिति सजातादिकं वैष्णवं च।।२०।।

विमर्शिनी

स्वस्वसूक्तान्याह-रुद्र इति। रुद्रे कद्रुद्रपूर्वं 'कद्रुद्राय प्रचेतसः' इत्यादिकं प्रजपतु। स्वभुवि विष्णौ 'अतो देवा' इत्यादिकं, शाङ्गींशे तद् द्वयं 'कद्रुद्रा'दिकम् 'अतो देवा'दिकं च, आर्यकं यातऊत्यादिकं 'या त ऊतिरवमे'त्यादिकम्, इदमुभयं रौद्रं वैष्णवं च, तारकारौ 'अग्निर्होता नो अध्वर' इत्यादिकम्, अथो गणपे गणानांपदाद्यम्,

---

१. 'न् प' क. ख. ग. ख. च पाठः। २. 'नि स्व' ३. 'क्तान्यु' क पाठः। ४. 'त्रा' क पाठः।

Shripuram Publication
www.shripuram.org

अस्मिन् द्वये स्कन्दे गणपे च रुद्रोक्तं च, महिषजिति सजातादिकं 'जातवेदस' इत्यादिकं वैष्णवं च प्रजपतु॥२०॥

विवरणम्

स्वभुवीति। विष्णौ। द्वयेऽस्मिन्निति स्कन्दे गणपतौ च। सुसमाप्येति व्यापकादिकमुक्तम्॥२०॥

यामावसाने सुसमाप्य धारां देवं यथाविध्यभिपूजयेत।
न चालयेद् वारुणमत्र पात्रं दिनत्रये यत्र करोति धाराम्॥२१॥

विमर्शिनी

यामावसाने त्रिपादसहितत्रिनाडिकावसाने धारां सुसमाप्य देवं यथाविध्यभिपूजयेत। यथाविधीत्यनेन तदानीमेव पूजायाः योग्यतेत्यभिप्रायः। यत्र दिनत्रये धारां करोति, तत्र वारुणं पात्रं न चालयेत्। एतेन दिनत्रये धारा कर्तव्या, आपत्पक्षे त्वेकदिनमित्यपि सूचितम्॥२१॥

विवरणम्

दिनत्रय इति च दोषभूयस्त्वाभिप्रायम्। यत्र शुद्धौ दिनत्रये धारां करोति गुरुः तत्रेत्यर्थः॥२१॥

औध्वाह्निके पर्युषिताम्बु हृत्वा
कृत्वान्यदिष्ट्वा प्रकरोतु शेषम्।
वारे तृतीये वरुणं च देवे
प्रोद्वास्य तत्पूजनमादधीत॥२२॥

विमर्शिनी

औध्वाह्निके अनन्तरदिवसगतायां[१] धारायां पर्युषिताम्बु अतिक्रान्तदिवसगतं जलं हृत्वा त्यक्त्वा अन्यच्छुद्धजलं कृत्वा सम्पाद्य इष्ट्वा तीर्थवरुणादिकमिष्ट्वा शेषं प्रकरोतु। तृतीये वारे दिवसे धारावसाने वरुणं[२] देवं च देवे प्रोद्वास्य तत्पूजनं धारापूजनम् आदधीत॥२२॥

---

१. 'यां च प' ख पाठः। २. 'ण' ङ पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

तदा च कटाहपूजायामस्ति विशेष इत्याह[1]- औध्वाह्निक इति। शुद्धवस्त्रमार्जनेनैतत् परिह्रियते। कृत्वान्यदिति। पूर्वोक्तवत्तत्र जलं गालयित्वेत्यर्थः। इष्ट्वेति पीठपूजावरणपूजादि[2] सर्वमुक्तम् इति[3]। अत्र सामान्यतो दोषे चतुर्भिर्मूर्तिपैस्सह एकदिने धारा, दोषभूयस्त्वे तु पुनरष्टभिर्द्वादशमभिर्वा सह संहितया दिनत्रयेऽपि धारेति भेद उक्तः।।२२।।

पात्रे पीठसमर्चनादिमहिते न्यक्कूर्चके स्वाणुभि-
र्गोमूत्रप्रमुखानि पञ्च परिमीयायोज्य गव्यान्यथ।
तानि ब्रह्ममथा विलोड्य मपरेणाभ्यर्च्य मूलाणुना
गन्धोदं च तथावगाहविधये सम्पूज्य संसाधयेत्।।२३।।

विमर्शिनी

अवगाहविधिमाह—पात्र इति। अथावगाहविधये पीठसमर्चनादिमहिते पीठपूजा-पात्रशोधनतत्पूजादिके न्यक्कूर्चके अधःकूर्चयुक्ते पात्रे स्वाणुभिः स्वस्वमन्त्रैः गोमूत्रप्रमुखानि पञ्च गव्यानि परिमीयायोज्य परिमाणेन योजयित्वा ब्रह्ममथा पालाशेन मथनसाधनेन तान्यालोड्य एकीकृत्य मपरेण प्रणवेनाभ्यर्च्यापरस्मिन् पात्रे मूलाणुना[4]ष्टगन्धोदकं चाभ्यर्च्य संसाधयेद् वस्त्रेणाच्छाद्याधिवास्य रक्षेत्।।२३।।

विवरणम्

अथावगाहं प्रस्तौति-पात्र इति। पीठसमर्चनादिमहित इति। पीठपूजा[5]स्त्रप्रोक्षणादयः पात्रपूजा उत्तानीकरणादय इत्येतत् सर्वमुक्तम्। स्वाणुभिरिति गोमूत्रादीनामेव वक्ष्यमाणैर्मनुभिः। परिमीयायोज्येति। तस्मिन्नेव वा परिमाणमपि। यद्वा पात्रान्तरेषु परिमीय संशोध्य तस्मिन् योजनम्। तानि मपरेण ब्रह्ममथा विलोड्येत्यन्वयः। मपरः प्रणवः। ब्रह्ममथेति तृतीया। पालाशेन मथनसाधनेनेत्यर्थः। सर्वत्रास्त्रप्रोक्षणादिकमर्थसिद्धम्। गन्धोदञ्च तथा सम्पूज्येति। पात्रान्तरे[6] पीठपूजादिपूर्वकमिति भावः। संसाधयेदिति मूलाभिमन्त्रणमुक्तम्।।२३।।

गोमूत्रं निजवाञ्छया परिमितं मूत्रार्धकं गोमयं
क्षीरं सप्तगुणं दधि त्रिगुणितं गोमूत्रमात्रं घृतम्।

---

१. 'त्याह्नि' क पाठः। २. 'रु' क पाठः। ३. 'ति। सा' च पाठः। ४. 'ना पुष्पग' क पाठः। ५. 'जा उत्ता' घ पाठः। ६. 'रेण पी' क पाठः।

Shripuram Publications
www.shripuram.org

प्राहुस्तत्सवितुर्वरेण्यमिति गन्धद्वारपूर्वं तथा-
प्यायस्वेति दधीति तेज इति गोमूत्रादिमन्त्रान् क्रमात् ।।२४।।

विमर्शिनी

तेषां परिमाणं मन्त्रं चाह–गोमूत्रमिति। तत्र गोमूत्रं निजवाञ्छया परिमितं स्यात्। मूत्रार्धकं गोमूत्रार्धकं गोमयं स्यात्। गोमूत्रात् सप्तगुणं क्षीरं स्यात्। गोमूत्रात् त्रिगुणितं दधि स्यात्। गोमूत्रमात्रं तत्तुल्यं च घृतं स्यात्। गोमूत्रादिमन्त्रान् क्रमात् 'तत् सवितुर्वरेण्यमि'ति, गन्धद्वारपूर्वं 'गन्धद्वारां दुराघर्षाम्' इत्यादि, तथाच 'आप्यायस्वे'ति, 'दधिक्राव्ण' इति, 'तेजोऽसी'ति आचार्या आहुः।।२४।।

विवरणम्

दधीति। दधिक्राव्णः तेज इति। तेजोऽसि तेजः।।२४।।

देवे पुनः स्नपनकर्मणि कर्मठोऽथ
ब्रह्मद्रुमादिकृतपञ्जरमाकलय्य।
संवेष्ट्य बिम्बमपि साधु सदर्भवस्त्रै-
र्गव्यैः प्रपूर्य तनुयादवगाहकर्म।।२५।।

विमर्शिनी

अथ कर्मठः कर्मणि कुशलो गुरुः स्नपनकर्मणि पीठपूजादिस्नानकाले प्राप्ते देवे ब्रह्मद्रुमादिकृतपञ्जरं पलाशादियाज्ञिकैर्वृक्षैः कृतं पञ्जरम् आकलय्य निश्छिद्रं सन्धयित्वा बिम्बमपि सदर्भवस्त्रैः साधु संवेष्ट्य गव्यैः प्रपूर्यावगाहकर्मतनुयात्।।२५।।

विवरणम्

कर्मठः समुचितकर्मकुशलः। अनेन पञ्जरबन्धग[१]कौशलं तत्पीठविवरे मा[२]षपिष्टलेपनं तत्कौशलमवमोकसमये तत्कौशलमिति सर्वमुक्तम्। साध्विति गव्यैः प्रपूर्येति नीराजनपूर्वकं धारोक्तनयेन तत्र शङ्खेन गव्यं सिक्त्वा शेषपूरणमुक्तम्।।२५।।

धारावदत्र परिजप्य मनूंश्च विप्रै-
स्तद्गव्यजातमपनीय सुगन्धतोयैः।

---

१. 'गतकौ' २. 'रे पि' क पाठः।

Shripuram Publications
www.shripuram.org

अन्तेऽवगाह्य परिशोध्य समस्तमेतद्
देवं यथोक्तविधिना परिपूजयेच्च।।२६।।

विमर्शिनी

अत्र च विप्रैः सह धारावद् धारायामिव मनून् परिजप्य तद्गव्यजातमपनीय त्यक्त्वान्ते सुगन्धतोयैरवगाह्य एतत् समस्तं परिशोध्य यथोक्तविधिना देवं परिपूजयेच्च।।२६।।

विवरणम्

धारावदिति। धारायां यावद्भिर्मूर्तिपादिभिस्सह यज्जपः कृतस्तावद्भिस्सह तज्जप इह कार्य इत्यर्थः। तद् गव्यजातमपनीयेति। यामान्ते तदुद्वासनव्यापकादिपूर्वकं माषलेपच्छिद्रादिभिस्तत् सर्वमवस्राव्येत्यर्थः। कृत्स्नगव्यपरिहाराभिप्रायेण गव्यजातमिति जातग्रहणम्। अन्ते सुगन्धतोयैरवगाह्येति। गव्यक्षालनार्थतया तदङ्गमेतदतो न पृथक् पूजा स्यात्तत्कालदशमांशश्चैतदवगाहकाल इत्येतदन्तग्रहणेन सूचितम्। समस्तमेतत् परिशोध्येति। तदुद्वासनव्यापकादिकमपि विधाय पञ्जरविकलनादिपूर्वकं तत्पारिवेष्टनवस्त्रादिकमपनीयाभिषिच्येत्यर्थः।।२६।।

तारं नादं शरलिपि महाव्योमविद्यादि पञ्च-
ब्रह्म श्रीरुद्रकमपि शिवे गाह्यमाने जपेयुः।
सम्पातं संस्पृशतु च शतं ब्रह्मभिस्तत्र सर्पि-
र्हुत्वा चत्वार्यहिशतमघोरेण च द्रव्यकाणि।।२७।।

विमर्शिनी

तत्र शिवे गाह्यमाने अवगाह्यमाने तारं, नादं प्रासादं, शरलिपि पञ्चाक्षरं, महाव्योमविद्या महाव्योमव्यापिचतुश्शताक्षरी। आदिशब्देन दशाक्षर्यादिकमुच्यते। पञ्चब्रह्म सद्योजातादीनि प्रसिद्धानि, श्रीरुद्रं च प्रसिद्धम्, एतानि मूर्तिपाः पात्रं स्पृशन्तो जपेयुः। तत्र शिवेऽग्रतोऽग्निमाधायाग्निमुखावसाने पञ्चभिर्ब्रह्मभिः शतं सर्पिः, अघोरेण अहिशतम् अष्टोत्तरं शतं चत्वारि द्रव्यकाणि च हुत्वा तदानीं तत्सम्पातं संस्पृशतु च।।२७।।

Shripuram Publications
www.shripuram.org

विवरणम्

अत्र शिवेऽवगाहजपे विशेषं दर्शयति-तारन्नादमिति। नादःप्रासादः। शरलिपि पञ्चाक्षरम्। महाव्योमव्यापिविद्या व्योमव्यापिमालामन्त्रः आदिग्रहणं तदङ्गाद्यर्थम्। गाह्यमाने अवगाह्यमामे। अत्र यामस्तु श्रीरुद्रावृत्त्या पूरणीयः। यद्वा पावमान्यादि-जपोऽपीष्यत एव सम्पातं संस्पृशतु चेति। तदङ्गतयाधिवासहोमे तत्सम्पातस्पर्शनमुक्तम्। वैष्णवेऽप्येतत्स्यादिति केचिदिच्छन्ति तदुक्तम्॥२७॥

व्यस्तैः समस्तैरपि पञ्चगव्यैर्गन्धोदनिष्ठैः सुगरिष्ठदोषे।
कार्योऽवगाहः क्रमशो दिनेषु तत्सेकमात्रेण च तल्लघिम्नि॥२८॥

विमर्शिनी

सुगरिष्ठदोषे सुतरां गुरुते दोषे दिनेषु एकैकदिनेष्वपि व्यस्तैः पृथग्भूतैः समस्तैर्युक्तैश्च पञ्चगव्यैः गन्धोदनिष्ठैः गन्धोदावसानैः क्रमशोऽवगाहः कार्यः। तल्लघिम्नि तस्य दोषस्य लघुतायां तत्सेकमात्रेण पञ्चगव्याभिषेकमात्रेणालम्॥२८॥

विवरणम्

अथ दोषभूयस्त्वे विशेषमाह-व्यस्तैरिति। गन्धोदनिष्ठैरिति। गोमूत्राद्येकैकावगाहान्ते गन्धोदकावगाह उक्तः। सुगरिष्ठदोष इति। एतत्पुरस्तादुक्तम्। दिनेषु क्रमश इति। प्रथमदिने गोमूत्रेण द्वितीयदिने गोमयोदकेनेत्येवं प्रकारेणेत्यर्थः। तत्सेकमात्रेण च तल्लघिम्नीति। अलमिति शेषः। यदा सप्तशुद्धिमात्रादिकमेव कार्यं तदा पात्रे पञ्चगव्यं सम्पूज्य तेनाभिषिञ्चेदिति भावः। गन्धोदकेन क्षालनमिहाप्यर्थाल्लभ्यते इति॥२८॥

न्यक्कूर्चानर्चितैकासनसमधिगतान् पञ्च कुम्भान् क्रमेण
प्रापूर्येशादिसूक्तैः स्मरजिति सकलेष्वेव वा पञ्चतत्त्वैः।

तैरेवेष्ट्वा ध्रुवैकीकृत इह निजमूलाणुनावाह्य देवं
साङ्गीकृत्यार्चयित्वा विधिवदथ पृथङ् मन्त्रयेच्च स्वमन्त्रैः[१]॥२९॥

---

१. 'न्त्रैः। दिश्यैश्यां धान्यपीठे कुशयुजि कलशान् पञ्च हेमाश्मगर्भान् गन्धाद्भिः संप्रपूर्या-र्णकमलयजनाद् येषु कृत्वोक्तमन्त्रैः। सर्वैरावाह्य साङ्गीकरणयजनकृत्तानथाभ्यर्च्य तेषामेकैकेना-भिषिच्यार्चयतु महति दोषे कुमध्यादिभिस्तम्॥ पी' क पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

सप्तमीं शुद्धिमाह-न्यक्कूर्चानिति। अर्चितैकासनसमधिगतान् अर्चित एकस्मिन्नेव पीठे स्थितान् न्यक्कूर्चान् अधःकूर्चान् पञ्च कुम्भान् स्मरजिति ईशादिसूक्तैः 'ईशानः सर्वविद्यानामि'त्यादिभिर्मन्त्रैर्वा मध्यादिक्रमेण, सकलेषु सप्तस्वपि देवेषु पञ्चतत्त्वैरेव वा प्रापूर्य तैरेवेष्ट्वा ध्रुवैकीकृते प्रणवेनैकीकृत इह निजमूलाणुना देवमावाह्य साङ्गीकृत्य विधिवदर्चयित्वाथ स्वस्वमन्त्रैः पृथङ् मन्त्रयेत् जपेच्च।।२९।।

विवरणम्

इदानीं अभिषेकमाह-न्यक्कूर्चानिति।

"प्रागुदग्भिश्चतुस्सूत्रैः क्षेत्रे नवपदे कृतम्।

मृष्ट्वा कोणपदान्यत्र मण्डले पञ्चकं यजेत्।।'

धान्यपीठकल्पनादिकं प्रसिद्धम्। तत्रैकमेव सर्वानुगतं पीठमिष्ट्वा तत्र पञ्च कुम्भान् संसाद्य संस्कृत्याधोऽग्रं कूर्चं निक्षिप्य मध्यादिक्रमेण पञ्चतत्त्वैः पूरयेत्। शिवे त्वीशानादिपञ्चब्रह्मभिः पूरयेत्। शैवेऽपि पञ्चतत्त्वैर्वेति विकल्पः। यद्वा प्रणवमूलद्वयगायत्रीसावित्रीभिर्वा, स्कन्द इत्याद्यपि सूचितम्। तैरेवेष्ट्वेति। पूरणमन्त्रैरेव तत्क्रमेणावाह्य सकलीकृत्य पूजयेत्। इह प्रणवेनाङ्गक्लृप्तिः। यद्वा प्रणवादिपञ्चपदैस्सर्वत्र पञ्चाङ्गानि कल्प्या पञ्चब्रह्मणां त्वङ्गानि कर्मशेषे वक्ष्यामः। प्रणनेकीरणं मूलार्चनार्थम्। विधिवदर्चयित्वेति। निवेद्यादिकमुक्तम्। अथ स्वमन्त्रैः पृथङ्मन्त्रयेच्चेति। प्रणवेन पृथग्विभाव्य स्वमन्त्रैरभ्यर्च्याभिमन्त्रणमुक्तम्।।२९।।

पीठार्चनादिस्नपनावसानं कृत्वाथ मध्यादिघटैः क्रमेण।
स्वपञ्चमन्त्रैरभिषिच्य देवं तन्न्यासपूर्वं परिपूजयेच्च।।३०।।

विमर्शिनी

अथ देवस्य पीठार्चनादिस्नपनावसानं कृत्वा स्वस्वपञ्चमन्त्रैर्मध्यादिघटैः क्रमेण देवमभिषिच्य तन्न्यासपूर्वं पञ्चतत्त्वन्यासादिपूर्वं यथा भवति तथा परिपूजयेच्च।।३०।।

विवरणम्

स्वपञ्चमन्त्रैरिति येन येन यो यः कलशः पूजितस्तेनतेनेत्यर्थः।।३०।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

कृत्वा शुद्धिमिहावगाहचरमां तत्संस्थतत्त्वव्रजं
संहृत्य प्रविलाप्य चात्मनि परस्मिन् धारणाभिस्ततः।
बिम्बं साधु विशोध्य तात्त्विकमयं प्रोद्भाव्य दिव्यं वपु-
र्मन्त्राध्वप्रसमिद्धमेभिरभिषिञ्चेद् वा घटैः[1] पञ्चभिः।।३१।।

विमर्शिनी

दोषाधिक्ये विशेषमाह-कृत्वेति। इहावगाहचरमां शुद्धिं कृत्वा तत्संस्थतत्त्वव्रजं तद्बिम्बस्थिततत्त्वसमूहमधिवासपटलोक्तक्रमेण संहृत्य परस्मिन्नात्मनि प्रविलाप्य ततो धारणाभिर्बिम्बं साधु उक्तक्रमेण विशोध्य तात्त्विकमयं तत्रैवोक्तक्रमेण तत्त्वस्वरूपं दिव्यं वपुः प्रोद्भाव्य प्रकर्षणोद्भूतं कारयित्वा मन्त्राध्वप्रसमिद्धं मूलमन्त्रावाहनषडध्वन्यासादिभिः प्रकर्षेण सन्दीप्तं तम् एभिः पञ्चभिर्घटैरभिषिञ्चेत्। वेति समुच्चयार्थः।।३१।।

---

१. टैर्दोषवित्।।

पुण्याहमुक्तविधिना सहमूर्तिपालो बिम्बे विधाय महितेन सगव्यकेन।
राज्यक्षतेन सुविकीर्य च पञ्चमन्त्रैः शेषेण वोक्षतु किरत्वपि सर्वतोऽत्र।।

कुर्याद् दोषे महति तु पुनः प्रोक्षणं मृष्टलिप्ते
शं नो वार्भिः सशुचिभिरिमा गन्धवार्भिः समुक्षेत्।
प्रासादान्तर्बहिरपि तथा सर्वतः पञ्चत्त्वै-
र्गव्यैश्चास्त्रेण विकिरतु राज्यक्षतैश्चाथ मन्त्री।।

कृत्वा भद्रकमत्र संरचितपीठे रत्नगर्भे महा-
कुम्भे पौरुषसूक्तशुद्धजलपूर्णे स्विष्टवर्णाम्बुजे।
मूलेन प्रयजेद्धरिं विधिवदाधारेषु विष्णुं महा-
विष्णुं मन्त्रविदर्चयेदथ सदा विष्णुं त्रितत्त्वान्वयात्।।

अस्त्रेण वर्धनीं तद्वामत इष्ट्वा हुतं विधाय ततः।
सम्पातशान्तितोयं तयोर्निषिच्याभिमन्त्रयेतापि।।

पुंविष्णोर्मनुभिर्जुहोत्वथ च चित्तिस्रुक्सप्तहोत्राचतु-
ष्षड्ढोत्राज्यमथेषुतत्त्वजितसावित्र्याख्यभूरादिभिः
मन्त्री हंस इति त्रिमूलजिनवर्णैर्मूलतः खादिरी-
र्ब्राह्मीर्वा सघृतान्नलाजतिलराजीश्चाष्टयुक्तं शतम्।।

बिम्बेऽर्कवर्णबिससूत्रजकौतुकाढ्ये कुम्भे गुहे तु समिदादिहुतान्ततोऽत्र।
वेदाणुमात्रकृतवास्तुहुताज्यभाजि सम्पातशेषत उपस्पृशतु त्रिमूलैः।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

दोषभूयस्त्वे विशेषमाह-दिश्यैश्यामिति।* हेमाश्मगर्भानिति। सुवर्णरत्नानि निक्षिप्येत्यर्थः। अर्णकमलयजनादीति लिपिपङ्कजपूजा मूर्तिभावेनेति सर्वमुक्तम्। सर्वैरुक्तमन्त्रैरिति। मध्यकुम्भे पुरुषादिचतुर्मन्त्रपुरस्कृतेन परमेष्ठिमन्त्रेण पूर्वकुम्भे[१] विश्वादित्रयपरमेष्ठिपुरस्कृतेन पुरुषमन्त्रेणेत्येवं प्रक्रियावाहनादिकं विवक्षितम्। पुनर्मूलेन पूजा स्यात्। तेषामेकैकेनेति। निजनिजतत्त्वमन्त्रेणेत्यर्थः। महति दोष इति। एतदस्माभिः प्रागुक्तम्।।

इदानीं समाधिशुद्धिं दर्शयति-कृत्वा शुद्धिमिति। तत्संस्थतत्त्वव्रजमिति। ध्यानाधिवासोक्तरीत्या विस्तारेण भूतादिसंहार उक्तः। अत एव विलाप्य चात्मनि परस्मिन्नित्यमप्यभिहितम्। कार्यं कार्यं कारणे कारणे संहरन् सर्वमपि द्वादशान्तवर्तिनि

प्रातः स्विष्टासनावाहितविभुविहिताघ्यादिरिष्ट्वा परीवा-
राढ्यं तं कुम्भमत्रानयतु करकधारापथेनाथ मन्त्री
तेन प्रोक्ष्याभिषिच्यार्चयतु च शमणोरित्यदश्शेषतोऽन्त-
र्धाम्नः प्रोक्षेद् बहिश्चावृतिगणमणुभिः स्वैरितीत्थं हरौ स्यात्।।
कृत्वा स्वस्तिकभद्रकं त्विह महाकुम्भ हरे पञ्चर-
त्नाढ्यं ब्रह्मभिरन्तरष्ट परिकुम्भान् दिक्षु चापूरयेत्।
मन्त्री घोरकलाणुभिर्यजतु तैर्मन्त्रैर्यथाहं सुधीः
सम्पातं हुतकृत् सशान्त्युदकमिष्ट्वासिच्य मन्त्रान् जपेत्।।
मध्याशास्वीशपूर्वैर्जुहुयुरिह समित्पायसव्रीहिलाजान्
व्याशासु त्र्यम्बकाद्येन च सहतिलराजीफलानाज्यनिष्ठान्।
प्रत्येकं चाष्टयुक्तं शतमिह समिधो ब्रह्मसालोद्भवाः स्युः
पश्चात् प्रसादसंस्थं प्रयजतु विधिवत् कर्मवित्तं च देवम्।।
सद्यो वोतापरेद्युर्विधिवदुपचिते पीठ आवाह्य देवं
स्नानान्तं प्राप्य संस्नापयतु मनुविदेनं महाकुम्भतोयैः।
पूजाशेषं च कुर्यादथ तदुपघटैरष्टमूर्त्यादि सर्वं
संस्नाप्यावस्रुतेनायतनभुवमपि प्रोक्ष्य रक्षेदितीशे।।

कृत्वा षड्दलमण्डलं शिखिमुखद्रव्याढ्यमत्रेषुजे कौमारं क. ग. घ. पाठः।

१. म्भे पर क पाठः।

* दिश्यैश्यामित्याधिकपाठमाश्रित्य प्रवृत्तेयं व्याख्या।

Shripuram Publications
www.shripuram.org

परमात्मनि विलापयेदिति। साध्विति नाभ्यादिषु वह्निमण्डलादिकल्पनमित्याद्युक्तम्। तात्त्विकमयमिति। तत्त्वव्रजं सृष्ट्वाब्दवृद्ध्यादिविधानमुक्तम्। मन्त्राध्वप्रसमिद्धमिति। लिपिभावनापीठन्यासादिपूर्वकं मन्त्रभावनाषडध्वन्यासा इत्येतत् सर्वमुक्तम्। पुनः पीठपूजादिकृत्वाभिषेचनं, तदुक्तम्-पीठार्चनादिस्नपनावसानमिति। दोषविदिति[1]। दोषभेदे विद्वान्। एतच्चास्माभिः प्रागुक्तम्।।३१।।

पुण्याहावधि शुद्धिरेवमखिले कार्या गुहे वाग्रतः
कौमारं कलशं पुरोवदभिपूर्यावाह्य चार्घ्यादिदः।
पुण्याहं स्नपने विधाय परिपूर्याप्च्छेषतोऽभ्यर्चयेद्
गव्यं तत्सविधे निधाय विकिरं चास्त्रेण संसाधयेत्।।३२।।

विमर्शिनी

अखिले देवे एवमुक्तप्रकारेण शुद्धिः पुण्याहावधि पुण्याहप्रोक्षणमवसाने यथा भवति तथा कार्या। गुहे दोषाधिक्ये महाकुम्भप्रोक्षणं कुर्यादित्याह गुहे वेत्यादिना। अत्राग्रतो मार्जानादिभिः शोधिते स्थले षड्दलं मण्डलमालिख्य विरचिते पीठे 'पीठान्ते ब्रह्माणमि'त्याद्युक्तप्रकारेण ब्रह्मादिभिः साकं पीठपूजां कृत्वा कौमारं कुमारदेवत्यं कलशं निधाय यथोक्तक्रमेण संशोध्योत्तानीकृत्य पुरोवद्धिरण्मयान् पद्मगजशिखिशक्तिवज्रान् निधायाभिपूर्य लिपिपङ्कजमिष्ट्वात्र स्कन्दमावाह्यार्घ्यादिदः अर्घ्याद्युपहारदो भूत्वा स्नपने स्नपनकाले कलशस्य पुण्याहं विधाय अप्च्छेषतः पुण्याहजलशेषेण च परिपूर्य परिवारपूजायां वज्रादेः प्रागित्यादिभिः[2] सह पुरोवदभ्यर्चयेत्। तत्सविधे तस्योदग्भागस्थस्वस्तिकयोर्गव्यं विकिरं च निधायास्त्रेणाभ्यर्च्य संसाधयेत्।।३२।।

विवरणम्

इदानीं बिम्बपुण्याहमाह-पुण्याहमिति। उक्तविधिनेति मार्जनोक्तन्यायेनेत्यर्थः। अयं प्रयोगः। देवाग्रतः पात्रे शान्त्युदकं तत्सन्निधौ पात्रद्वंये पञ्चगव्यं सर्षपाक्षतञ्च संसाध्य पुनः पीठपूजापूर्वकमावाहनादि कृत्वा स्नपनसमये प्रोक्षणादि कुर्यादिति। शेषेण वेति। पुण्याहशेषेण गव्यशेषेण सर्वत्र प्रोक्षणं सर्षपाक्षतशेषेण विकिरणं चोक्तम्। अत्र गव्यादिकर्मणि शेषविनियोगे वा विकल्पोऽवगन्तव्यः।।

१. 'षभेद' क पाठः। २. 'गादित्या' ख. ग. घ. च पाठः।

Shripuram Publications
www.shripuram.org

दोषभूयस्त्वे विशेषं जलसम्प्रोक्षणाख्यं प्रस्तौति-कुर्याद्दोष इति। कुर्याद्दोषे महति[१] तु पुनः प्रोक्षणमित्युद्देशः। शेष एतद्विवरणं मृष्टलिप्त इति प्रासादान्तर्बहिरपि तथा सर्वत इत्यस्य विशेषणम्। मार्जनमुपलेपनञ्चैतल्लौकिकमेव। 'शं नो देवी'रिति सशुचिभिर्जलैः 'इमा आपः' इति गन्धजलैश्च समुक्षणं कार्यम्। पञ्चतत्त्वैर्गव्यैश्चेति। समुक्षेदित्यनुकर्षः। मन्त्रीति शुद्धजलगन्धजलादीनामस्त्रप्रोक्षणादि सर्वं सूचितम्। एतावत् सर्वं साधारणं विशेषानुपादानात्। स्कन्दे गव्यविकिरौ प्रोक्षणानन्तरमिति विशेषः। वक्ष्यति च प्रोक्ष्य च गव्योक्षां[२] विकिरार्पणं चेति।।

कृत्वा भद्रकमित्यादि वैष्णवम्। संरचितपीठ इति। शालिवस्त्रादिभिरिति शेषः रत्नगर्भ इति रत्नहिरण्यन्यास उक्तः। पौरुषसूक्तशुद्धजलपूर्णे इति। शङ्खे जलं सम्पाद्य पुरुषसूक्तमूलादिकमुच्चार्य पूरयेदित्यर्थः। विधिवदिति कृत्स्ना पूजोक्ता। मन्त्रविदिति। मन्त्रप्रयोगक्लृप्तिं विद्वानित्यर्थः। त्रितत्त्वान्वयादिति। अयमिह प्रयोगः मूलाधारहृदयभ्रूमध्येषु पद्मं सम्पूज्य 'ओं अं नमः परायात्मतत्त्वात्मने विष्णवे नमः' इत्यादिमन्त्रैस्त्रिभिरावाहनन्यायेनावाहनादि कृत्वा पूजयेदिति।।

तयोरिति[३] महाकुम्भे वर्धन्यां च।।

तत्र हुतक्लृप्तिं दर्शयति-पुंविष्णोस्स्वणुभिरिति। 'सहस्रशीर्षे'ति षोडशभिः, 'विष्णोर्नुक'मिति षड्भिः, 'चित्तिःस्रुक्', 'महाहविर्होता', 'पृथिवी[४] होता' 'सूर्यन्ते', पञ्चतत्वैः, 'जितन्ते' 'तत्सवितुः', 'व्याहृतिभिः', हंसश्शुचिषद् षडक्षरेणाष्टाक्षरेण, द्वादशाक्षरेण, विष्णुगायत्र्या, चाज्यं हुत्वा पूर्णाहुतिं विधाय मूलेन समिदादि षड्द्रव्यं जुहुयात्। पञ्चद्रव्यपक्षे घृतं हविराद्यङ्गमेवेति द्रष्टव्यम्।।

द्वयोस्सम्पातशान्तितोयन्निषिच्येति यदुक्तं तत्रापि विशेषं दर्शयेति-बिम्ब इति। अयमिह प्रयोगः। कलशपूजानन्तरमन्तःप्रविश्य पीठपूजापूर्वकमावाहनादि कृत्वा द्वादशाक्षरेण पद्मसूत्रकृतं कौतुकं बद्ध्वा तत्र सम्पातस्पर्शनं विधाय महाकुम्भवर्धन्योरपि तत्कृत्वा पुनः प्रासादेऽपि सम्पातस्पर्शनं कर्तव्यम्। तत्रायं विशेषः। तत्रैशेऽग्निमाधायाग्निमुखं कृत्वा पक्वं वास्तोष्पते ते प्रतिमनुयुगलेनेत्याद्युक्तरीत्या व्याहृतिपर्यन्तं

---

१. 'ति पु' क पाठः। २. 'क्षामपीति अर्पयेति', ३. 'ति व' क पाठः। ४. 'वी न्ते' क पाठः।

Shripuram Publication
www.shripuram.org

हुत्वा पूर्णां कृत्वा स्विष्टकृदादिशेषं समाप्य तत्सम्पातं प्रासादा[१]न्तस्तलोद्देशे संस्पृश्य पुनरेव प्रकृत[२]सम्पातस्पर्शनमिति। वेदाणुमात्रेति वेदमन्त्रैरेवात्र होमः स्यान्न चतुर्द्रव्यदूर्वा-होमोऽपीति भावः।।

प्रातरिति। सा निशा प्रतिष्ठोक्तवदुत्सवेन नेतव्येत्यपि गम्यते। स्विष्ट आसन आवाहिताय विभवे विहितोऽर्घ्यादिर्येनेति समासः। परीवा[३]राढ्यं तमिष्ट्वेति। पुनराचमनीयं दत्त्वा परिवारप्रसरणं कृत्वा तैरावृतं देवं सम्पूज्य स्नानं दद्यादिति भावः। करकधारापथेन कुम्भमत्रानयत्विति। ब्रह्मकलशानयनरीत्येति भावः। अथ मन्त्री तेन प्रोक्ष्याभिषिच्यार्चयतु चेति। नीराजनादिपूर्वकं तेन पुण्याहमन्त्रवित्प्रोक्ष्य हुतमन्त्रान् 'शं नो देवीरणोरणीयानि'ति च जपन्नभिषिच्य व्यापकादि कृत्वा पूजां विदध्यादित्यर्थः। अदश्शेषत इति। अमुष्य शेषेणेत्यर्थः। पू[४]जावसानेऽभिषेकशेषेण गर्भगृहनाडीमुखमण्डपान्तर्मण्डलादिस्थलं 'शं नो देवीरणोरणीया'निति ज[५]पन् प्रोक्षेत्। तत्राष्टमूर्त्यादि सर्वं निजनिजमन्त्रैः प्रोक्षेदिति भावः। इति।।

अथ शैवमुच्यते-कृत्वा स्वस्तिकभद्रकन्त्वित्यादि। पञ्चब्रह्मभि[६]र्मध्यकगतं महाकुम्भं शङ्खेन पूरयेत्। प्रागाद्यष्टपरिकलशानघोरमन्त्रस्य कलांशैरष्टभिः क्रमेण पूरयेत्। मन्त्रीति पूरणमन्त्रप्रयोगक्लृप्तिं विद्वानित्यर्थः। यद्वावाहनमन्त्रप्रयोगक्लृप्तिं विद्वानिति।।

हुतक्लृप्तिं दर्शयति-मध्याशास्विति। व्याशास्विति विदिशः। कर्मविदिति होमविधानविदित्यर्थः।।

सद्यो वेति। कलशपूजानन्तरमेव वेत्यर्थः। उतापरेद्युकन्निशाशेषमुत्सवेन नीत्वा तद्दिने प्रातर्वेत्यर्थः। उपचिते पूजिते इति।।

अथ स्कान्दमुच्यते-कृत्वा षड्दलमण्डलमित्यादि। पुरोवदभिपूर्येति। तत्सविध इति। तत्सन्निधौ। वामत स्वस्तिकद्वयं विधाय तत्रेत्यर्थः। संसाधयेदिति पूजाभिमन्त्रणमुक्तम्। अस्त्रप्रोक्षणादि त्वर्थसिद्धम्।।३२।।

विकिरमिह व्रीहियवं तिलतण्डुलमाषसर्षपं च तथा।
दूर्वादर्भकुशाग्रं तुलसीदलनलिनकेसरं चाहुः।।३३।।

१. 'दे', २. 'तं' घ. च पाठः। ३. 'रि' क पाठः। ४. 'जाभिधाने' च पाठः। ५. 'जलं प्रो', ६. 'भिर्मुग्धक' क पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

तत्रत्यं विकिरद्रव्यमाह-विकिरमिति। इह व्रीहियवं तिलतण्डुलं[१]माषसर्षपं च तथा दूर्वादर्भकुशाग्रं दूर्वादर्भकुशानामग्राणि तुलसीदलं पद्मकेसरं च विकिरमाहुः।।३३।।

आद्यं रौद्रं घटमभिमृशन्तो निजं शाकुनं च
स्वस्तिश्रीदैवतमपि जपेयुः शमाद्यं नृसंज्ञम्।
सूक्तं यस्मिन्प्रभृतिकमथो वातआद्यं द्विमूलं
साङ्गं गायत्र्यणुमपि तथा षड्द्विषण्णामतारान्।।३४।।

विमर्शिनी

अथो मूर्तिपाः घटमभिमृशन्तः स्पृष्टवन्तः आद्यम् 'अग्निमील' इत्याद्यं सूक्तं, रौद्रं 'कद्रुद्राये'त्याद्यं, श्रीरुद्रं च, निजम् 'अग्निर्होता नो अध्वर' इत्याद्यं शाकुनं 'कनिक्रददि'त्याद्यं, स्वस्तिश्रीदैवतं 'स्वस्ति नो मिमीता'मित्याद्यं 'हिरण्यवर्णा'मित्याद्यं च, शमाद्यं 'शं न इन्द्राग्नी' इत्याद्यं, नृसंज्ञं पुरुषसूक्तं, यस्मिन् प्रभृतिकं 'यस्मिन् वृक्षे सुपलाश' इत्याद्यं, वात आद्यं 'वात आवात्वि'त्याद्यं, साङ्गम् अङ्गसहितं द्विमूलं मूलमन्त्रद्वयं, गायत्र्यणुमपि, षड्द्विषण्णामतारान् षण्मन्त्रान् द्वादशनाममन्त्रान् प्रणवं च जपेयुः।।३४।।

विवरणम्

आद्यं वेदादिसूक्तमनुवाकं वा। निजम् 'अग्निर्होता न' इति कौमारसूक्तम्। शमाद्यं 'शं न इन्द्राग्नि'ति। सूक्तं नृसंज्ञं पुरुषसूक्तम्। यस्मिन्[२] प्रभृतिकं यस्मिन् वृक्ष इत्यन्यत् कौ[३]मारसूक्तम्। वात आद्यं वेदापवर्गं षड्द्विषण्णामतारान् षण्मन्त्रान् द्वादशनाममन्त्रान् प्रणवं च जपेयुः।।३४।।

स्नाने तत्कलशेन देवमभिषिच्याब्लिङ्गमूलाह्वयै-
स्तच्छेषेण कुशद्विजद्रुमशमीशाखाग्रकैः प्रोक्ष्य च।
गव्योक्षां विकिरार्पणं च सुविधायैतत्त्रिशेषार्पणं
कृत्वा तत्परिषत्सु शेषभुजि चाथो देवमभ्यर्चयेत्।।३५।।

---

१. 'लं' क पाठः। २. 'न् वृ' क पाठः। ३. 'कु' च पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथान्तर्गत्वा पीठपूजापुरस्सरं देवमावाह्य स्नाने स्नानकाले तत्कलशेनाभिषिच्य तच्छेषेण कुशद्विजद्रुमशमीशाखाग्रकैः कुशपलाशशम्यग्रैः अब्लिङ्गमूलाह्वयैः 'आपो हिष्ठा'दिभिर्मूलाभ्यां षण्णामभिर्द्वादशनामभिश्च प्रोक्ष्य तथास्त्रमन्त्रेण गव्योक्षां विकिरार्पणं च सुविधाय तत्परिषत्स्वपि एतत्त्रिशेषार्पणं कलशजलगव्यविकिरैरर्पणं कृत्वा शेषभुजि धूर्तसेनेऽपि कृत्वाथो देवमभ्यर्चयेत्।।३५।।

विवरणम्

स्नान इति। देवे पीठपूजापूर्वकमावाहनादि कृत्वा स्नपनसमय इत्यर्थः। अब्लिङ्गमूलाह्वयैरिति। पुण्याहमन्त्रैर्मूलद्वयेन षण्णामभिर्द्वादशानामभिश्चेत्यर्थः। गव्यविकिरयोरस्त्रमन्त्रः। शेषभुजि चेति। तत्र समाप्तिः सूचिता। स्थलेऽपि सर्वत्र प्रोक्षणाद्युचितमेव। अथो देवमभ्यर्चयेदिति प्रकृतपूजा परिसमापनमुक्तम् इति।।३५।।

निमित्तवित्ताद्युपपत्तिक्लृप्तं[1]पारायणाढ्यं प्रविधाय चैवम्।
सामान्यशुद्धिं विदधीत तत्तद्दोषोपशान्त्यै विहितं हुतं च।।३६।।

विमर्शिनी

निमित्तवित्ताद्युपपत्तिक्लृप्तपारायणाढ्यं निमित्तस्यार्थस्य, आदिशब्देन कालदेशादेरप्युपपत्त्या कल्पितेन वेदत्रयजपपारायणेनाढ्यं परिपूर्णं यथा भवति तथा सामान्यशुद्धिमेवं विधाय तत्तद्दोषोपशान्त्यै विहितं हुतं च विदधीत।।३६।।

विवरणम्

अथेदानीं शुद्धिप्रकरणं सविशेषमुपसंहरन् प्रायश्चित्तप्रकरणमारभतेनिमित्तवित्ताद्युपपत्तिक्लृप्त्येति। निमित्तानां वित्तस्य देशकालादीनाञ्चोपपत्या या क्षालनादीनां क्लृप्तिरिहैतावत् कार्यमिति नियमस्तयेत्यर्थः। यद्यपि निमित्तोपपत्तिवशादेव साक्षान्नियमः किन्तु वित्ताल्पत्वे बहुदिनधारादिदुष्करमेवेति वित्तादिवशादपि स्यान्नियमः। पारायणाढ्यमिति समन्ताद्वेदोद्घोषणं, विशेषोऽप्युक्तः धारायां पूजाविधानात्ततः प्रभृत्येतत् प्रवृत्तिः। निमित्तादिवशान्नियमोऽत्रापि तुल्य एव। सामान्यशुद्धिमिति प्रायश्चित्तानि

---

१. 'प्त्या' क पाठः।

Shripuram Publications
www.shripuram.org

सामान्योत्पाताद्[1]भुतादिभेदतो भिन्नानि शुद्धयस्तु तेषु सामान्यभूता इति भावः। अत एवोक्तं तत्तद्दोषोपशान्त्यै विहितमिति।।३६।।

अर्धेन्दुरूपे दिशि दक्षिणस्यां सुरालयस्यारचितेऽग्निकुण्डे।
महेशविष्णवीशगुहप्रभेशविघ्नेश्वरेषु प्रथमं जुहोतु।।३७।।

विमर्शिनी

तत्र शङ्करप्रोक्तादीन् होमान् विधत्ते-महेशविष्णवीशगुहप्रभेशविघ्नेश्वरेषु पञ्चसु देवेषु प्रथमं प्रायश्चित्तादिहोमेभ्यः पूर्वं सुरालयस्य प्रासादस्य दक्षिणस्यां दिशि अर्धेन्दुरूपे अर्धचन्द्राकारेणारचितेऽग्निकुण्डे जुहोतु।।३७।।

विवरणम्

प्रथमं जुहोत्विति। अत्रायमभिप्रायः। शिवादिषु तावदयमेव प्रायश्चित्तहोमः। दोषभूयस्त्वे तु तदनन्तरं प्रागुक्तहोमोऽपि स्यादिति। दुर्गायामपि समानमेतत्।।३७।।

वज्राणूल्लिखितेऽस्त्रमन्त्रविहितोक्षेऽत्राञ्चिते विष्टरे
स्थाणौ सेशहरौ सवामभुवनेश्यावाह्य चेष्ट्वानया।
सद्यात्तेशसुजप्तघोरमहिताजक्षिप्तहृत्पूजिते
पञ्चाग्नौ शिववामघोरनृशिवैः कुर्यात् क्रमेण क्रियाः[2]।।३८।।

विमर्शिनी

तत्र शङ्करप्रोक्ताख्यस्य होमस्य पूर्वोक्तादग्निजननाद् विशेषमाह-वज्राणूल्लिखित इति। सेशहरौ स्थाणौ वज्राणूल्लिखिते द्वादशपटले वक्ष्यमाणः प्रणवद्वयमध्यगतो हुंफट्कारो वज्रमन्त्रः तेनोल्लेखने कृते अस्त्रमन्त्रविहितोक्षे अस्त्रमन्त्रेण विहिता उक्षा उक्षणं यत्र अत्र अञ्चिते पूजिते विष्टरे पीठे सवामभुवनेश्या वामदेवयुक्तया भुवनेश्वर्या आवाह्य अनया भुवनेश्वर्या च सद्यात्तेशसुजप्तघोरमहिताजक्षिप्तहृत्पूजिते सद्योजातेनात्ते गृहीते ईशानेन सुतरां जप्ते अघोरेण पूजिते अजेन सद्योजातेन निक्षिप्ते प्रासादहृदयेन पूजिते चाग्नौ शिववामघोरनृशिवैः ईशानवामदेवाघोरतत्पुरुषेशानैः क्रमेण गर्भाधानपुंसवनसीमन्त-जातकर्मनामकरणाख्याः पञ्च क्रियाः कुर्यात्।।३८।।

---

१. 'ताद्भूता' क पाठः। २. 'याः।। भी' ख पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

सद्यात्तेति सद्येनादाय नाभौ निधाय तत्संस्कारानन्तरमीशानेनाभिमन्त्र्याघोरेण सम्पूज्य सद्येनायतन आधाय प्रासादहृदयेन पूजयेदिति। शिव ईशानः पञ्च क्रिया इति नामावसानाः।।३८।।

प्रारभ्य तत्राग्निमुखं निजोक्तनीत्यास्य पार्श्वे कलशं प्रपूज्य।
पक्वं च पञ्चप्रणवादिनास्येनाहृत्य पूजामनुभिश्च सर्पिः।।३९।।

भीमाजाह्वयवामवक्त्रमनुभिः सौदुम्बरीमार्गजा-
ज्यान्नान्यष्टसहस्रकं वसुशतं पुंसा तिलान् सर्षपान्।
मुद्गव्रीहियवान् घृताक्तनवदूर्वाग्राष्टसाहस्र-
मप्येतेनाष्टशतं जुहोतु दधिमध्वाज्यानि जुंसाणुना।।४०।।

विमर्शिनी

तत्र शङ्करप्रोक्ते निजोक्तनीत्या स्वगृह्योक्तक्रमेणाग्निमुखं प्रारभ्य परिधिस्थापनात् पूर्वं तत्पार्श्वदेशे कलशं प्रपूज्य परिधिस्थापनाद्यनन्तरं पञ्चप्रणवादिना आस्येन तत्पुरुषेण पक्वं पूजामनुभिः सर्पिश्चाहृत्य भीमाजाह्वयवामवक्त्रमनुभिः अघोरसद्योजातवामदेव-तत्पुरुषमन्त्रैः सौदुम्बरीमार्गजाज्यान्नानि उदुम्बरापामार्गघृतहवींषि प्रत्येकमष्टसहस्रं जुहोतु। तिलान् सर्षपान् मुद्गव्रीहियवांश्च पुंसा तत्पुरुषेण वसुशतमष्टोत्तरशतं च जुहोतु। घृताक्तनवदूर्वाग्राष्टसाहस्रं घृताक्तानां नवीनानां दूर्वात्रिकाणाम् अष्टोत्तरं सहस्रमपि एतेन तत्पुरुषेण जुहोतु। दधिमध्वाज्यानि प्रत्येकमष्टशतं जुंसाणुना मृत्युंजयमन्त्रेण च जुहोतु।।३९-४०।।

विवरणम्

एतेनेति। पुंसा दधिमध्वाज्यान्यष्टशतमित्यन्वयः।।४०।।

आज्यं प्राग्वज्जनितदहनेऽत्र प्रधानाति कृत्वा
षड्भिः षड्विंशतिपरिमितैः स्वाह्वयैश्च प्रभेशे।

Shripuram Publications
www.shripuram.org

षण्मूलाणुद्वितयजिनवर्णाणुभिर्बाहुलेये
षड्द्वन्द्वाख्यामनुभिरपि भूरादिमन्त्रैश्च हुत्वा।।४१।।

बैल्वीरार्येऽत्र नैपीः शरभुवि समिधोऽथ द्वयोराज्यमन्नं
षण्मन्त्रैर्लाजराजीयवतिलमपि हुत्वा शतं द्व्युत्तरं तु।
आज्यं क्षीरं दधि क्षौद्रमपि वसुशतं व्याहृतीभिः क्रमेण
त्रिस्वाद्वक्तास्त्रिसाहस्रकमपि जुहुयात् जुंसमन्त्रेण दूर्वाः।।४२।।

विमर्शिनी

अत्र रेवन्तप्रोक्तस्कन्दप्रोक्तयोर्होमयोः प्राग्वद् अष्टक्रियाभिर्जनितदहने प्रधानादि पक्वहोमादिपूजामन्त्रहोमान्तं कृत्वा प्रभेशे द्वादशे पटले वक्ष्यमाणैः षड्भिः षड्विंशतिपरिमितैश्च स्वाह्वयैः स्वनामभिः 'ओं रेवन्ताय स्वाहा' इत्यादिभिः, बाहुलेये स्कन्दे षण्मूलाणुद्वितयजिनवर्णाणुभिः षण्मन्त्रैः मूलमन्त्रद्वयेन गायत्र्या च षड्द्वन्द्वाख्यामनुभिः द्वादशनाममन्त्रैरपि भूरादिमन्त्रैरपि व्याहृतिभिश्चाज्यं हुत्वा, आर्ये बैल्वीः समिधः, शरभुवि नैपीः कदम्बोद्भवाश्च समिधः। अथ द्वयोः आर्यस्कन्दयोः आज्यमन्नं लाजराजीयवतिलमपि समिदादिसप्तद्रव्यं षण्मन्त्रैः स्वस्वषण्मन्त्रैः सप्तदशकृत्वः आवर्तितैः द्व्युत्तरं शतं हुत्वा आज्यं क्षीरं दधि क्षौद्रमपि व्याहृतीभिश्चतसृभिः क्रमेण वसुशतमष्टोत्तरशतं त्रिस्वाद्वक्ताः त्रिमधुरसिक्ता दूर्वाश्च जुंसमन्त्रेण मृत्युञ्जयेन त्रिसाहस्रमपि जुहुयात्।।४१-४२।।

विवरणम्

षट्शब्देन षण्णामग्रहणम्। षट्द्वन्द्वाख्यामनुभिरिति द्वादशनामानि।।४१।।

षण्मन्त्रैः इति। षण्णां सप्तदशावृत्त्या द्व्युत्तरशतसंख्यासिद्धिः।।४२।।

षण्मन्त्रैर्घृतमेकशो वसुशतं वैतैरधीवासगं
द्रव्यं बिल्वसमिद्घृतादिकमपूपान्तेऽत्र वा लड्डुकम्।
भूराद्यैः क्रमशो दधिस्तनजमध्वाज्यं गणानामृचा
गौलं चाष्टशतं जुहोतु गणपे गव्यं च मूलाणुना।।४३।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

गणपे पूजामन्त्रहोमान्ते षण्मन्त्रैरेकशो वा वसुशतम् अष्टोत्तरशतं वा प्रथमं घृतं जुहोतु। पुनरेतैः षण्मन्त्रैः अधीवासगम् अधिवासगतं बिल्वसमिद्घृतादिकं

बिल्वसमिदाज्यचरुलाजपृथुकलड्डुकापूपशष्कुल्याज्यानि नव द्रव्याणि। अत्र विघ्नप्रोक्ते अपूपान्ते वा लड्डुकाष्टशतं च जुहोतु। पृथुकादिनामान्युक्तानि। पुनर्भूराद्यैः क्रमशो दधिस्तनजमध्वाज्यं दधिक्षीरमध्वाज्यानि चाष्टशतं जुहोतु। गणानामृचा गौलं च, मूलाणुना गव्यं चाष्टशतं जुहोतु। अत्र गव्यशब्देन घृतमेवोच्यते इति केचिदाहुः। तथा क्रियासारे वैघ्ने-

"विघ्नगायत्रिया पक्वं षण्मन्त्रैर्जुहुयाद् घृतम्।
अष्टोत्तरशतं भूयः समिदादीनि होमयेत्।।
पूर्णाहुतिं तु मूलेन सर्वत्रैव ददेत् पृथक्।
बैल्वास्तु समिधः प्रोक्ता हुनेदष्टोत्तरं शतम्।।
समिदाज्यचरून् लाजान् पृथुकापूपलड्डुकान्।
क्रमाद् वै शष्कुलीनाज्यं व्याहृतीभिरतः परम्।।
पृथक् पृथक् समस्ताभिरन्त्यमष्टशतं पृथक्।
दधि क्षीरं मधु घृतं गणानां त्वेत्यृचा गुलम्।।
मूलेनाष्टोत्तरशतं गव्यं होमं समापयेत्।।'

इति।।४३।।

विवरणम्

षण्मन्त्रैरिति वसुशतं वेति अष्टोत्तरसहस्रं वेति विकल्पोऽवबोद्धव्यः। पूर्वत्र शतं व्युत्तरं त्वित्यत्राप्येवमिष्यते। द्व्युत्तरसहस्रं वा त्रिसहस्रं वेति। अत्रापूपान्ते वा लड्डुकमिति। अधिवासे हि तावत् समित्सर्पिषी अन्नलाजपृथुकाख्यान् लड्डुकापूपकान् शष्कुल्याज्यमिति द्रव्यनवकमुक्तम्। इह तु तथा वा अपूपलड्डुकेत्येवं वा क्रम इत्यर्थः। गव्यञ्चेति। अष्टशतमित्यनुकृष्यते।।४३।।

Shripuram Publications
www.shripuram.org

विश्वद्रव्यैरिति शिवशिवश्रीशयोः स्कन्दशास्त्रो-
रेकन्यूनैर्द्विरदवदने द्व्युत्तरैश्चापि[1] देवम्।
हुत्वा मन्त्रैर्हवनविहितैः स्नापयेत् तद्घटादि्भ-
स्तत्र स्थानाद्यधिगतमहोत्पातदोषोपशान्त्यै।।४४।।

विमर्शिनी

शिवशिवश्रीशयोः विश्वद्रव्यैः त्रयोदशद्रव्यैः स्कन्दशास्त्रोः एकन्यूनैः द्वादशद्रव्यैः, द्विरदवदने द्व्युत्तरैः पञ्चदशद्रव्यैश्चापि हुत्वा होमं कृत्वा हवनविहितैः होमार्थमुक्तैर्मन्त्रैः तद्घटादि्भः तत्तद्धोमकलशजलैः तत्र तत्र स्थानाद्यधिगतमहोत्पातदोषोपशान्त्यै स्थानादौ संभूतानां 'क्षेत्रे मृतिर्जननमि'त्याद्युक्तानां महोत्पातदोषाणामुपशान्त्यै देवं स्नापयेत्।।४४।।

विवरणम्

विश्वद्रव्यैस्त्रयोदशद्रव्यैः। अदसीयेनेति एतदीयेन मन्त्रीति हुतमन्त्रजप उक्तः।।४४।।

अथाग्रतोऽग्निं प्रजनय्य कुण्डे
तत्पार्श्वदेशे कलशं प्रपूज्य।
कुर्यात् कृशानौ परिधानपक्व-
होमार्चनामन्त्रहुतिक्रियाद्यम्।।४५।।

विमर्शिनी

प्रायश्चित्तहोमं वक्ति-अथाग्रत इति। अथ देवस्याग्रतः कुण्डेऽग्निं यथोक्तक्रमेण प्रजनय्य तत्पार्श्वदेशे कलशं च प्रपूज्य कृशानौ परिधानपक्वहोमार्चनामन्त्रहुतिक्रियाद्यां परिधिस्थापनादिपक्वहोमपूजामन्त्रहोमपूर्णाहुतीः कुर्यात्।।४५।।

विवरणम्

तत्र प्रथमं सामान्योत्पातविषये प्रायश्चित्तमभिधत्ते-तत्राग्रतोऽग्निमित्यादि। परिधानं परिधिनिधानम्। पक्वमग्न्यलङ्करणपीठपूजादिपूर्वकं स्वकाले पक्व[2]होमः, अर्चनामन्त्र[3]-हुतिक्रियापूजामन्त्रैराज्यहोमः। आदिशब्देन पूर्णाहुत्याद्यवशेषः उक्तः।।४५।।

---

१. 'होमं। कृत्वा संस्नापयतु कलशेनादसीयेन देवं मन्त्री पातादिमृतिजननस्तेनवेगादिकेषु'।। क पाठः। २. 'ञ्च', ३. 'न्त्रा'

www.shripuram.org
Shripuram Publications
www.shripuram.org

मन्त्रैः पञ्चकचोदितैस्त्रिगुणसाहस्रं घृतं साष्टकं
साहस्रं समिदाज्यशालितिललाजानां पृथङ् मूलतः।
भूराद्यैर्जुहुयात् पलाशसमिधोऽथ द्वादशोर्ध्वं शतं
सावित्र्याष्टशतं सदुग्धदधिमध्वाज्यानि चान्ते पृथक्॥४६॥

विमर्शिनी

पञ्चकचोदितैः पञ्चकाभिषेके कथितैर्मन्त्रैः त्रिगुणसाहस्रं स्वस्वपञ्चमन्त्रैः षट्छतावृत्त्या त्रिसहस्रं घृतं जुहुयात्। समिदाज्यशालीतिललाजानां पञ्चानां द्रव्याणां साष्टकं साहस्रं पृथगष्टोत्तरसहस्रं मूलतो जुहुयात्। अथ पलाशसमिधः भूराद्यैरष्टविंशत्यावर्तितैश्चतुर्भिर्मन्त्रैः द्वादशोर्ध्वं शतं च, पुनरन्ते सदुग्धदधिमध्वाज्यानि चत्वारि सावित्र्या 'तत्सवितुरि'त्याद्यया पृथगष्टशतं जुहुयात्॥४६॥

विवरणम्

पञ्चकचोदितैरिति। सर्वेषु निजनिज[1]पञ्चतत्त्वैः शिवे पञ्चब्रह्मभिरित्यर्थः। पञ्चभिः षट्च्छतहोमे त्रिसहस्रसंख्या स्यात्। मूलतस्साष्टकं साहस्रमिति योजना। चतुर्व्याहृतिभिरष्टाविंशतिहोमे द्वादशोत्तरशतं लभ्यते। सावित्र्येति शुद्धसावित्री गृह्यते॥४६॥

एकत्रेति समन्ततोऽस्य चतसृष्वाशासु चाष्टासु वा
तद्वद्राशिषु वा विहृत्य दहनं कुण्डेषु तन्मत्रतः।
तत्तद्दोषबलाबलानुसरणाद्धुत्वा समुक्तक्रमात्
तत्सम्पातघटैर्गुरुः स्नपितयेद् देवं च मध्यादिभिः॥४७॥

विमर्शिनी

तत्तद्दोषबलाबलानुसरणात् तस्य तस्य दोषस्य दौर्बल्यप्राबल्यानुसारेण इत्येकत्र कुण्डे वास्य कुण्डस्य समन्ततः चतसृष्वष्टास्वाशास्वपि वा तद्वद्राशिषु मेषादिद्वादशराशिगतस्थानेषु वा कुण्डेषु दहनमग्निं तन्मन्त्रतः विहरणोक्तमन्त्रैर्विहृत्य गुरुमूर्तिपाः समुक्तक्रमात् हुत्वा गुरुरेव मध्यादिभिस्तत्सम्पातघटैर्देवं स्नपितयेत्॥४७॥

---

१. 'जत' क पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

राशिषु वेति। मेषादिक्रमेण विहरणाभिषेकौ[1] भवतः। तन्मन्त्रत इति। तत्तद् दोषबलाबलानुसरणादिति।

"प्रायश्चित्तं त्रिवर्गज्ञस्नपने त्वधमेऽधमम्।
मध्यमे मध्यमं कुर्यात् सर्वेषूत्तम उत्तमम्" ।।

इति। त्रिवर्गज्ञः स्नपनानां प्रायश्चित्तानाञ्चाधमादिवर्गत्रयाभिज्ञ इति। तदुक्तं-

'चत्वारो मूर्तिपा हीने मध्येऽष्टौ द्वादशोत्तमे।'

इति। मन्त्री स्नपितयेदिति हुतमन्त्रान् जपन् देवं स्नपितं कुर्यादित्यर्थः। मध्यादिभिरिति क्रमेणैव स्नपनमुक्तम्।।४७।।

ब्राह्मी[2] मूलविभावसौ परिहुताशेष्वब्धिसङ्ख्येषु चेत्
क्षीर्युत्थाष्टसु चेत् पलाशखदिराश्वत्थोत्थिता प्लक्षजा।
प्रागादिक्रमतः समिद् वटभवा बैल्वी तथौदुम्बरी
काष्मर्यप्यखिलेषु वा द्विजभवा सैवार्कसङ्ख्येषु चेत्।।४८।।

विमर्शिनी

मूलविभावसौ मध्यकुण्डस्थाग्नौ ब्राह्मी पालाशी समित्। परिहुताशेषु परितः स्थितेष्वग्निषु अब्धिसंख्येषु चतुस्संख्येषु चेत् क्षीर्युत्था स्वस्वतोरणक्रमेण क्षीरवृक्षोद्भवा समित्। परिहुताशेष्वष्टसु चेत् पलाशखदिराश्वत्थोत्थिता पलाशोत्थिता खदिरोत्थिता अश्वत्थोत्थिता च प्लक्षजा वटभवा बैल्वी औदुम्बरी काष्मर्यपि प्रागादिक्रमतः समित्। अखिलेष्वपि परितः स्थितेषु चतुर्ष्वष्टसु च द्विजभवा पालाशी वा। अर्कसंख्येषु द्वादशसु चेत् सैव पालाश्येव समित् स्यात्।।४८।।

विवरणम्

*ता वा स्वतोरणभुवोऽथवेति योजनीयम्। निजनिजतोरणक्रमेणैव दिक्कुण्डक्रमोऽपि द्रष्टव्यः। तथेति पलाशसमिद्विकल्पानुकर्षणार्थः[3]।।४८।।

---

१. 'क' क पाठः। २. 'ब्रह्मद्रुजास्तु समिधो गुरुकुण्डहोम्यास्ता वा स्वतोरणभुवोऽथ चतुर्दिशासु। ईशाधिवासविहिताश्च तथाष्टदिक्षु पालाश्य एव दहनेषु पुनर्दिषट्सु। पत' क. ख. ग. पाठः। ३. 'र्थः।' 'दुर्गा' क पाठः। * 'ब्रह्मद्रुजास्तु' इति पाठमनुसृत्येयं व्याख्या।

Shripuram Publications www.shripuram.org

पतनादिषु दोषेषु प्रकरोतु हरौ हरे च हुतमेवम्।
शिवशार्ङ्गिण्युभयं वै शेषेष्वपि कैश्चिदिष्यते कुहचित्।।४९।।

विमर्शिनी

पतनादिषु 'बिम्बस्य पातचलनादिरि'त्याद्युक्तेषु दोषेषु सत्सु हरौ हरे च एवं हुतं होमं प्रकरोतु। शिवशार्ङ्गिणि उभयं द्विविधं होमं प्रकरोतु। शेषेषु देवेषु कुहचिद् विघ्नादिष्वपि कैश्चिदिष्यते।।४९।।

विवरणम्

पतनादिष्विति। बिम्बस्य पातचलनादिरित्याद्युक्तेषु। मृतिजननस्तेनवेशादिकेष्विति। वै शेषेष्वपि कैश्चित् कुहचिदिष्यते इति। दुर्गायां गणपतौ शास्तरि चेत्यर्थः।।४९।।

प्रासादस्य त्रिकोणं शशिदिशि यमदिश्यर्धचन्द्राभमेतत्
कुण्डं चाधाय वह्निं पृथगथ जनयित्वा समुक्तक्रमेण।
होमं कुर्यात् कुमार्यां हरिवरुणदिशोश्चापि तुर्यश्रवृत्ते
कुण्डे दोषे गरिष्ठे चरतु हवनकर्मोत्तरैन्द्रादिक्लृप्त्या।।५०।।

विमर्शिनी

दुर्गायां प्रायश्चित्तहोमविशेषमाह-प्रासादस्येति। (कुमार्यां) प्रासादस्य शशिदिशि उत्तरभागे त्रिकोणं कुण्डं[१], यमदिशि दक्षिणभागेऽर्धचन्द्राभम् एतत् प्रस्तुतं कुण्डं चाधाय समुक्तक्रमेण सप्तक्रियाभिर्वह्निं पृथग् जनयित्वाथ होमं कुर्यात्। होममिति जातावेकवचनम्। दोषे गरिष्ठे गुरुतरे सति हरिवरुणदिशोः प्राक्पश्चिमदिशोश्चापि तुर्यश्रवृत्ते चतुरश्रे वृत्ते चापि कुण्डे तद्वदग्निं पृथग् जनयित्वा उत्तरैन्द्रादिक्लृप्त्या हवनकर्म होमं चरतु। तत्र उत्तरैन्द्रादिक्लृप्त्येति उत्तरप्राग्दक्षिणपश्चिमदिक्क्रमेणेति केचिद्, उत्तरदक्षिणप्राक्-पश्चिमदिक्क्रमेणेति केचिदाहुः।।५०।।

विवरणम्

दुर्गायां प्रायश्चित्तान्तरमाह-प्रासादस्थेति। चकारो भिन्नक्रमः। अर्धचन्द्राभञ्च कुण्डमिति। आधायेति। विरचय्येत्यर्थः। समुक्तक्रमेणेति मण्डपसंस्कृताविति शेषः।

१. 'ण्डद्वयं चा' ङ पाठः।

Shripuram Publications
www.shripuram.org

हरिशब्देनेन्द्रग्रहणं कुण्डे इति द्विवचनम्। अपि चेत्याधाय पृथगग्निञ्जनयित्वेत्येतदनुकर्षणार्थः। उत्तरादिक्रमेणेति। द्विकुण्डयोगे उदग्दक्षिणत इति, चतुष्कुण्डयोगे उदक् प्राक् दक्षिणतः पश्चादिति च क्रमेणेत्यर्थः।।५०।।

हुत्वात्र प्रथमं दिगुत्तरशतं दुर्गाभिराज्यं ततो
जाताद्यैर्निजमूलतश्च पृतनाद्यैश्च त्रिभिर्व्युत्क्रमात्।
मन्त्रैरष्टशतं हुनेत् खदिरविप्राश्वत्थकप्लक्षजा
नैयग्रोधमयूरबिल्वसमिधः सौदुम्बरीः साञ्जलीः।।५१।।

विमर्शिनी

अत्र होमे प्रथमं दुर्गाभिः 'जातवेदस' इत्यादिभिः पञ्चभिर्दुर्गाभिः दिगुत्तरशतं द्वाविंशत्यावृत्त्या दशोत्तरशतमाज्यं हुत्वा ततो जाताद्यैः 'जातवेदस' इत्याद्यैः पञ्चभिः, निजमूलतः पृतनाद्यैः 'पृतनाजितमि'त्याद्यैः व्युत्क्रमात् त्रिभिः 'पृतनाजितं' 'विश्वानि नो' 'अग्ने त्वं पारये'ति त्रिभिः एवं नवभिर्मन्त्रैः खदिरविप्राश्वत्थकप्लक्षजाः नैयग्रोधमयूरबिल्वसमिधः सौदुम्बरीः साञ्जलीश्च नव समिधः क्रमेणाष्टशतं हुनेत्। (മയൂരം - കടലാടി, അഞ്ജലി - മുക്കുറ്റി) ।।५१।।

विवरणम्

दिगुत्तरशतमिति। दशाधिकं शतम्। पञ्चानां द्वाविंशत्यावृत्तावेतत्संख्यालाभः। जाताद्यैरिति। 'जातवेदस' इत्याद्यैः क्रमेण पञ्चभिः। व्युत्क्रमादिति। 'पृतनाजितं', 'विश्वानि नो', 'अग्ने त्व'मित्येभिः।।५१।।

तिलसर्षपनीवारान् मूलेन दधिमाक्षिकम्।
आज्यं च मृत्युञ्जयतो जुहुयात् तावदन्ततः।।५२।।

विमर्शिनी

पुनः तिलसर्षपनीवारान् मूलेन, दधिमाक्षिकमाज्यं च मृत्युञ्जतश्च अन्ततः अवसाने तावद् अष्टशतं जुहुयात्। तत्कलशैरपि तामभिषिञ्चेदित्यपि सिद्धं भवति।।५२।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

मृत्युञ्जयतो दधिमाक्षिकमाज्यञ्चेति अन्वयः। तावदिति। तिलादीनां सर्वेषां अष्टाधिकशतसंख्योक्ता।।५२।।

प्रासादं परितो विहृत्य गुरुकुण्डादग्निमग्राहितात्
कुर्युः शान्तिहुतानि पञ्च नव वाथाग्रेऽखिलान्येव वा।
स्कन्दे द्वादशवासराद्यहरहस्तत्स्नानपूजादिभि-
स्त्र्यावृत्त्यैकदिनेऽथवात्र च घटाः कार्याः पृथक् कर्मसु।।५३।।

विमर्शिनी

अथ स्कन्दे अग्राहितात् पुरोभागे स्थितात् गुरुकुण्डाज्जनितमग्निं प्रासादं परितः प्रासादस्य परितश्चतसृषु दिक्ष्वष्टासु दिक्षु वा कुण्डेषु विहृत्य गुरुमूर्तिपाः पञ्च नव वा शान्तिहुतानि शान्त्याह्वयानि हवनानि कुर्युः। अखिलान्यपि हुतानि अग्र एव वा कुर्युः। एतान् होमांस्तु द्वाद्वशवासरादिनियमेनाहरहः तत्स्नानपूजादिभिः कुर्युः। अथवा आपत्पक्षेऽपि एकदिनेऽपि त्र्यावृत्त्या त्रिकृत्वः कुर्युः। आपत्पक्षे कर्मसु त्रिष्वपि पृथक् घटाः कार्याः, पृथगेव होमाः कलशाभिषेकाश्च कार्या इत्यर्थः।।५३।।

विवरणम्

स्कन्दे होमान्तरमाह-प्रासादमिति। पञ्चेति। गुरुकुण्डे प्राग्दक्षिणादिकुण्डेषु च। नव वेति। गुरुकुण्डे प्रागाग्नेयादिकुण्डेषु चेत्यवगन्तव्यम्। अग्र एव वाखिलानीति। प्रासादस्य समन्ताद्धोम उक्तः। यद्वा प्रासादाग्रतो मण्डपं विधाय तत्रैव पञ्च होमा नव होमा वेति विकल्प्यते। द्वादशवासरादीति[1]। त्रिदिनावधीत्यभिप्रयते। त्र्यावृत्त्यैकदिनेऽथवेति जघन्यपक्ष उक्तः। अत्र चेति। त्र्यावृत्तिपक्षे। कर्मस्विति[2]। होमेषु पातादिमृतिजननस्तेन-वेशादिकेष्वित्येतदिहापि समानम् इति।।५३।।

अष्टोर्ध्वं समिधः शतं सकलनाम्ना बीजनाम्ना चरुं
गोसर्पिर्महतात्र सर्षपतिलान् बीजाणुना जुह्वतु।
मध्ये दिक्षु विदिक्षु नीपवटजाः सोदुम्बराश्वत्थजाः
प्लक्षब्रह्ममधूकजाश्च समिधो जम्बूकपित्थोत्थिताः।।५४।।

---

१. 'दि', २. 'स्थि' क पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

विमर्शिनी

अत्र होमे सकलनाम्ना सकलाभिधानमन्त्रेण समिधः (अष्टोर्ध्वं शतं) जुह्वतु। बीजनाम्ना बीजाभिधानमन्त्रेण चरुं जुह्वतु। महता महन्मन्त्रेण गोसर्पिः। गोसर्पिरित्यनेन गवामाज्यमेव सर्वकर्मणि ग्राह्यमित्युक्तं भवति। सर्षपतिलान् सर्षपान् तिलांश्च बीजाणुना पूर्वोक्तेन बीजमन्त्रेण जुह्वतु। अत्र मध्ये दिक्षु विदिक्षु च क्रमात् नीपजाः वटजाः उदुम्बरजाः अश्वत्थजाः प्लक्षजाः ब्रह्मजाः मधूकजाः जम्बूत्थिताः कपित्थोत्थिताश्च समिधः स्युः।।५४।।

शान्तिहोममथ शर्वदिशि[१] श्रुत्यश्रकुण्डजनितात्महुताशे।
आदधीत सकलेष्विह पक्वेज्याणुहुत्यवधिकर्म पुरोवत्।।५५।।

विमर्शिनी

अथ सकलेषु शर्वदिशि ईशकोणे श्रुत्यश्रकुण्डजनितात्महुताशे चतुरश्रकुण्डजनित-स्वस्वाग्नौ शान्तिहोममादधीत। इह पक्वेज्याणुहुत्यवधिकर्म पक्वहोमपूजामन्त्रहोमान्तं कर्म पुरोवत् पूर्ववदादधीत।।५५।।

विवरणम्

सामान्योत्पातेषु प्रायश्चित्तमुक्तम्। इदानीमद्भुतेष्वाह-शान्तिहोममथेति।।५५।।

सर्पिः स्वोपनिषद्द्विषड्वसुजिनार्णाणूपचारैर्नृसू-
क्तोत्थाभिर्जिनवारमृग्भिरपि हुत्वाज्यान्तरालेषु तैः।
विष्णौ मार्गभवामृताः सहसहैन्द्रीभद्रिकाः साञ्जली-
र्दूर्वासर्षपशालिकान् यवतिलान्नं चोक्तसङ्ख्यं हुनेत्।।५६।।

विमर्शिनी

विष्णौ स्वोपनिषद्द्विषड्वसुजिनार्णाणूपचारैः स्वोपनिषदः स्वस्य पञ्चतत्त्वानि, द्विषडर्णं द्वाद्वशाक्षरं, वस्वर्णमष्टाक्षरं, जिनार्णं गायत्री, उपचारो 'जितं त' इति एतैर्नवभिर्मन्त्रैः, पुनर्नृसूक्तोत्थाभिः पुरुषसूक्तभवाभिः षोडशभिः ऋग्भिः, इति पञ्चविंशत्या मन्त्रैः जिनवारं जिनाश्चतुर्विंशतिः तावद्वारं सर्पिः प्रथमं हुत्वा तैरेव मन्त्रैः आज्यान्तरालेषु

---

१. 'शायां क्लृप्तक्' क. ख. ग. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

मार्गभवामृताः अपामार्गसमिधोऽमृतलतोद्भवाश्च, सहसहैन्द्रीभद्रिकाः सहाभिः सहिता ऐन्द्रीभद्रिकाः सहाः, ऐन्द्रीः, भद्रिकाश्च, साञ्जलीः अञ्जलिभिः सहिताः अञ्जलीश्च, दूर्वासर्षपशालिकान् दूर्वाः, सर्षपान्, शालींश्च, यवतिलान्नं च यवांस्तिलान्, अन्नं च एतानि द्वादशद्रव्याणि उक्तसंख्यं चतुर्विंशतिवारं हुनेत्।।५६।।

विवरणम्

सर्पिरिति। अयमिह प्रयोगः। पञ्चतत्त्वानि द्वादशाक्षरमष्टाक्षरं गायत्री जितन्तः पुरुषसूक्तस्य षोडश ऋच इति पञ्चविंशति मन्त्राः। एतैश्चतुर्विंशतिवारमाज्यं प्रथमं जुहुयात्। मन्त्रभेदेषु च पूर्णाहुतिं तत एतैर्मन्त्रैराज्यमपामार्गमाज्यममृता इत्यादि क्रमेण हविराज्यमिति यावत् पञ्चविंशति द्रव्याणि क्रमेण जुहुयात्। द्रव्यभेदेषु च पूर्णाहुतिरिति। दोषभूयस्त्वे संख्या वर्धते। तदुक्तं-

"चतुर्विंशतिशो हुत्वा शतशो वा सहस्रशः।'

इति। अत्र सहस्रसंख्यायां पञ्चकुण्डेषु द्विद्विशतवारं होमः स्यात्।।५६।।

गायत्र्या निजया पयोद्रुसमिदाज्यान्नानि दूर्वा मधु-
क्षीराज्यस्नपिता वसूत्तरशतं लाजाः सराजीतिलाः।
होतव्या यवशालिसक्तुघृतयुक्ता धूर्जटौ ते समि-
त्सर्पिर्मध्यगदौर्व्यकास्तिलयवव्यत्यासिनश्चेषुजे।।५७।।

विमर्शिनी

धूर्जटौ शिवे पयोद्रुसमिदाज्यान्नानि पयोद्रुमाः क्षीरवृक्षाः प्लक्षोदुम्बरवटाश्वत्थक्रमगताः तेषां समिधः, आज्यमन्नं च, पुनः मधुक्षीराज्यस्नपिताः त्रिमधुरसिक्ता दूर्वाः। अत्र सर्वत्र त्रिमधुरोक्तौ मधुक्षीराज्यान्येवेत्यप्यनेनोक्तं भवति। लाजाः, सराजीतिलाः सर्षपास्तिलाश्च, यवशालिसक्तुघृतयुक्ताः यवाः शालयः सक्तवो घृतं च एते चतुर्दश निजया गायत्र्या तत्पुरुषेण वसूत्तरशतमष्टाधिकं शतं होतव्याः। इषुजे त एव समित्सर्पिर्मध्यगदौर्व्यकाः समित् दूर्वा सर्पिः क्रमात् तिलयवव्यत्यासिनः तिलयवव्यत्यासयुक्ता यवतिलक्रमेणेत्यर्थः। स्कन्दे त्वेतत्क्रमेण स्वगायत्र्यैवाष्टशतं चतुर्दश द्रव्याणि होतव्यानीत्यर्थः।।५७।।

Shripuram Publications
www.shripuram.org

विवरणम्

पयोद्रुसमिच्छब्देन तोरणक्रमोऽपि परिगृहीतः। समित्सर्पिर्मध्यगदौर्व्यका इति। पयोद्रुसमिधस्त्रिमधुराक्तदूर्वा आज्यमित्ययं क्रम उक्तः।।५७।।

विघ्नेशे हवनं गिरीशवदिदं प्रायोऽत्र लाजादिकं
षट्कं स्वोदितमेव शास्तरि पुनः साहस्रमष्टाधिकम्।
गायत्र्यैव तिलान् घृतं च जुहुयाद् यागाणुना केवलं
तावत् सुम्भरिपौ घृतं हरिहरे द्व्युक्तं पृथक् प्राचरेत्[1]।।५८।।

विमर्शिनी

विघ्नेशे इदं हवनं प्रायो गिरीशवत् शिवोक्तवत्। अत्र तु लाजादिकं षट्कं स्वोदितमेव लाजपृथुकलड्डुकापूपशष्कुल्याज्यानि। शास्तरि पुनर्गायत्र्यैव तिलान् घृतं च पृथगष्टाधिकं साहस्रं जुहुयात्। सुम्भरिपौ वक्ष्यमाणेन यागाणुना केवलं घृतं तावदष्टसाहस्रं जुहुयात्। हरिहरे द्व्युक्तं शैवोक्तं वैष्णवोक्तं च पृथगुभयत्राचरेत्।।५८।।

विवरणम्

लाजादिकं षट्कं स्वोदितमेवेति। लाजपृथुकलड्डुकापूपशष्कुल्याज्यानीत्यर्थः। हरिहरे द्व्युक्तं पृथक् प्राचरेदिति।।५८।।

---

१. 'त्।।
पूर्वोदितेषु दहनादिषु घोरसत्त्वैः क्षेत्रे श्रितेऽनवघृतावपि निष्क्रियायाः।
हुत्वेति संस्नपितयेत् कलशेन शेषेणोक्षेच्च तत्र मनुविन्मधुसम्भवादौ।।
कुर्याद् वान्यां तु शान्तिं शिवहरिति यतः स्वस्तिदाः पक्वमाज्यं
वास्तोर्वास्तोश्च हुत्वाशमिति च पुनरिन्द्राग्न्यृचाथो कयानः।
तद्वत् को अद्य मन्त्री भवतमिति ततश्शाकुनस्वस्तिवास्तो
मन्त्रैः पञ्चाणुभिर्दैर्गमनुभिरनलेशं पृथग् व्याहृतीभिः।।
गायत्र्या द्विजसमिदन्नलाजराजीर्हुत्वाज्यान्तरिततया तिलान् यवांश्च।
मुद्गांश्चाहितबलिरन्नशेषतोऽग्रे शान्त्याग्रे स्नपयतु तद् घटेन देवम्।।
सर्वेषु निष्कृतिहुतेषु गरिष्ठदोषे शान्त्यम्बुसम्पतितशेषमवस्रुताम्भः।
गव्यं समस्तमथ सर्वहुतावशेषं पात्रेषु षट्सु हुतभस्म च सन्निधाय।।
स्वास्त्रेण तानि परिपूज्य समूर्तिपालस्तेनाभिमन्त्र्य सहसाष्टसहस्रवारम्।
तैर्मृष्टलिप्तसनिमित्तभुवि क्रमेण प्रोक्ष्यास्त्रतो यजतु चाष्टदले तदस्त्रम्।।
श्रीनारा' क. ग. घ. पाठः।

www.shripuram.org
Shripuram.org
www.shripuram.org

*अत्र दोषभूयस्त्वे होमवृद्धिरिष्यते। तदुक्तं-मधुसम्भवादाविति। यत्र मधुवल्मीकादि-सम्भवस्तत्रेत्यर्थः।।

शान्तिहोमान्तरमाह-कुर्याद्वेति। शिवहरीतीति[1]। ऐशानदिशि। यतः स्वस्तिदाः पक्वमिति। 'यत इन्द्र भयामहे', 'स्वस्तिदा विशस्पति'रिति युगलेन पक्वमित्यर्थः। वास्तोर्वास्तोश्चेति। 'वास्तोष्पते प्रतिजानीहि', 'वास्तोष्पते शग्मया', 'शं नो देवी', 'इन्द्राग्नी रोचना', 'कयानश्चित्र' 'को अद्य[2] युङ्क्ते', 'भवतन्नस्समनसौ', 'कनिक्रदत्', सूक्तद्वयं, स्वस्तिसूक्तं, 'वास्तोष्पते ध्रुवा', गृह्यं भयं[3] वास्तोष्पते प्रतरणोऽमीवहा पञ्चाणवश्शैवे। पञ्चब्रह्माण्यन्येषु पञ्चतत्त्वानि पञ्चदुर्गाः 'शं न इन्द्राग्नी'सूक्तं व्याहृतिचतुष्टयमिति सम्भूय वा सप्तदिर्मन्त्राः ततः पूर्णाहुतिः।।

आज्यान्तरिततयेति। यथा अग्नेरग्रे अन्नशेषेण शान्त्या अहितबलिरित्यन्वयः। स्विष्टकृदवदाने कृते बल्यर्थं हविरुद्धृत्य स्विष्टकृति हुत्वेऽग्निपूर्वभागे स्थण्डिलं दर्भान् विकीर्य तत्र 'शं नो देवी'रित्यनया सम्पूज्य तयैव तेनोद्धृतहविषा बलिं हरेदित्याशयः।।

हुत्वेति तत्तदुदितक्रमतोऽभिषिच्य
तं तं तदीयकलशेन यजेच्च देवम्।
श्वस्पर्शनादिविषये सकलेष्वथैश्यां
दिश्येव शान्तिहवनं तनुयादथैतत्।।५९।।

विमर्शिनी

इति तत्तदुदितक्रमतः तत्र तत्र हुत्वा तदीयेन तदीयेन च कलशेन तं तं देवमभिषिच्य यजेच्च। अत्र चशब्देनापरः शान्तिहोमोऽपि सूचितः। तथा पाशुपते-

"यत इन्द्रादिमन्त्राभ्यां पक्वं द्वाभ्यां तु होमयेत्।"

'यत इन्द्र भयामहे', 'स्वस्तिदा विशस्पतिरि'ति मन्त्रद्वयेन पक्वं होमयेदित्यर्थः।

"वास्तोष्पते वास्तोष्पते शन्नो देवीरभीत्यृचा।।"

'वास्तोष्पते प्रतिजानीहि', 'वास्तोष्पते शग्मया', 'शं नो देवीरभिष्टये।'

"इन्द्राग्नीरोचना भूयः कयानश्चित्र इत्यपि।

* 'पूर्वोदितेषु' इत्याद्यधिकपाठमाश्रित्येयं व्याख्या।

१. 'तीशा' क पाठः। २. 'आ' च पाठः। ३. 'अ' च पाठः।

Shripuram Publications
www.shripuram.org

को अद्य युङ्क्तेति हुत्वा भवतन्न इति क्रमात्।।
षड्भिः कनिक्रदाद्यैस्तु भूयः स्वस्त्यादि चाष्टभिः।।
वास्तोष्पते ध्रुवाद्यैस्तु षड्भिर्जातादिपञ्चभिः।"

जातादीति सद्योजातादिभिरित्यर्थः।

"जातवेदादिभिस्तावच्छन्नवर्गैश्च पौरुषैः।
व्याहृतीभिः क्रमाद्धुत्वा सम्पातविधिना घृतम्।।
ततो ब्रह्मसमिच्चान्नलाजसिद्धार्थकांस्तिलान्।
यवान् मुद्गान् क्रमादेतैः पृथगाज्यान्तरे हुनेत्।।
पुंसा चतुर्दशद्रव्यैरष्टोत्तरशतं पृथक्।
होमं समाप्य तस्याग्रे शमीपर्णेषु दापयेत्।।
हुतशेषं विधानेन शन्नोदेवीरिति ब्रुवन्।
हुतमन्त्रैश्च संस्नाप्य सम्पातकलशेन तम्।।
प्रोक्षयित्वा च तत्स्थाने दक्षिणां गां प्रदापयेत्।"

इति।

"महद्बहुषु चोग्रेषु निमित्तेषूभयं स्मृतम्।
अल्पेष्[१]वन्यतमं वापि प्रायश्चित्तमथानयोः।।"

इति। अथ सकलेषु श्वस्पर्शनादिविषये श्वचोरस्प[२]र्शनादिनिमित्तेऽपि ऐश्यां दिश्येव एतदपि शान्तिहवनं तनुयात्। अत्र पूर्वं पञ्चगव्यावगाहानन्तरं

"शुद्धाद्भिस्त्वग्रसैर्गन्धैस्तीर्थतोयैश्च शोधयेत्।"

इत्युक्त[३]प्रकारेण शोधयित्वा प्रायश्चित्तशान्तिहोमाद्यनन्तरमेतच्छान्तिहोमं कुर्यात्।।५९।।

श्रिनारायणसूक्तजैर्मनुमितैर्मन्त्रैरिहैकैकशः
श्रिसूक्तप्रभवैस्त्रिपञ्चभिरतोदेवेति षड्भिस्तथा।
नासत्षोडशाभिर्द्विसप्तदशकेनांहोमुचां संसमि-
त्पूर्वैरब्ध्यणुभिः सभद्रचरणैः सारायिपञ्चाणुभिः।।६०।।

---

१. 'ष्वेकत' ख. घ. च पाठः। २. 'र्शादि' ख. घ. पाठः। ३. 'क्रमेण' ख. घ. ङ. च पाठः।

Shripuram Publications
www.shripuram.org

गायत्र्या निजया स्वपञ्चमनुभिश्चाहुत्य सर्पिः क्रमात्
पश्चात् साष्टशतं जुहोतु समिधोऽश्वत्थोत्थिताः खादिरीः।
प्लाक्षीर्ब्रह्ममयीः सपाटलवटोद्भूताः स्वमूलाणुना
होमान्ते कलशेन देवमदसीयेनापि सिक्त्वा यजेत्।।६१।।

विमर्शिनी

इह होमे पूजामन्त्रहोमानन्तरं श्रीनारायणसूक्तजैर्मनुमितैश्चतुर्दशमन्त्रैः, श्रीसूक्तप्रभवैः त्रिपञ्चभिः पञ्चदशमन्त्रैः, 'अतो देवे'ति षड्भिः, तथा नासत्षोडशभिः 'नासदासीदि'त्यादि-षोडशमन्त्रैः, पुनरंहोमुचां द्विसप्तदशकेन चतुस्त्रिंशता, संसमित्पूर्वैः 'संसमिदि'त्यादिभिः अब्ध्यणुभिश्चतुर्मन्त्रैः, सभद्रचरणैः 'भद्रं नो अपी'त्यादिपादयुक्तैरेतैः, सारायिपञ्चाणुभिः 'आरायिकाण' इत्यादिपञ्चमन्त्रैर्युक्तैरेतैः, निजगायत्र्या, स्वपञ्चमनुभिः स्वस्वपञ्चतत्त्वैश्च इत्येकाधिकशतमन्त्रैरेकैकशः क्रमात् सर्पिराहुत्य पश्चात् अश्वत्थोत्थिताः खादिरीः प्लाक्षीः ब्रह्ममयीः, सपाटलवटोद्भूताः, (പാടലം=പാതിരി) एताः षट् समिधः स्वमूलाणुनाष्टशतं जुहोतु। होमान्ते अदसीयेन अमुष्मात् सम्भूतेन कलशेन देवमपि सिक्त्वा यजेत्।।६०, ६१।।

देवाग्रे प्रजनय्य वह्निमथ तत्पार्श्वेऽष्टपत्त्रे[1]ऽम्बुजे
पीठाराधि[2]पुरस्सरेण विधिना संपूर्य कुम्भं गुरुः।
तत्त्वावाहननिष्ठमत्र सुविधायावाह्य मूलणुना
साङ्गीकृत्य यजेत तं हुतवहे कुर्यात् परिध्यादि च।।६२।।

विमर्शिनी

अथ तत्त्वहोममाह- देवाग्र इति। अथ गुरुः स्वयं देवाग्रे देवस्याग्रगतमण्डपे चतुरश्रकुण्डे वह्निं प्रजनय्य तत्पार्श्वे अष्टपत्रेम्बुजे पीठारादिपुरस्सरं पीठपूजापूर्वं विधिना ब्रह्मकलशोक्तप्रकारेण कुम्भं सम्पूर्य तत्त्वावाहननिष्ठं तत्त्वावाहनपर्यन्तं कर्म सुविधायात्र मूलाणुनावाह्य साङ्गीकृत्य तं देवं कलशस्थं यजेत। हुतवहेऽग्नौ परिध्यादि परिधिस्थापनादि च कुर्यात्।।६२।।

---

१. 'त्रा'ग पाठः। २. 'द्धि' ख., 'ति' ग पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

अथ तत्तवहोममभिधत्तेदेवाग्र इति। तत्त्वावाहननिष्ठमत्र सुविधायेति। ब्रह्मकलशोक्तप्रकारेणेति भावः।।६२।।

पूजामन्त्रहूतान्तमत्र सुविधायापीतिरीत्याखिलै-[१]
स्तत्त्वैराज्यहूतिं विधाय मनुबिम्बेऽन्तः समायोज्य च।
सम्पातं परिकल्प्य विश्वविलयं भूयः सिसृक्षार्थना-
पूर्वं प्राप्य बहिः स्वमूलमनूनाष्टाज्याहुतिं चाचरेत्।।६३।।

विमर्शिनी

अत्रापि पूजामन्त्रहुतान्तं सुविधाय स्वैः स्वैरखिलैस्तत्त्वैरपीति रीत्या संहारक्रमेणाज्यहुतिं विधायान्तर्गत्वा मनुबिम्बे तत्त्वैर्मन्त्रैः संहारक्रमेण (सम्पातं) समायोज्य विश्वविलयं सर्वतत्त्वानां लयं परिकल्प्य भूयः सिसृक्षार्थनापूर्वं सृष्टिविधानाय देवं प्रार्थ्य नाडीसन्धानकृद् बहिरग्निसमीपं स्वमूलमनुनाष्टाज्याहुतिं चाचरेत्।।६३।।

विवरणम्

अपीतिरीतिः संहारप्रकारः। वक्ष्यति च पुरः कोपतत्त्वेन[२] तद्वत्यशेष इत्यादि। अन्तर्मनुबिम्बे समायोज्य चेति। प्रासादान्तरभ्येत्य पीठमिष्ट्वा देवामावाह्य तत्त्वन्यासादि विधाय पुनराचमनीयान्तं समर्प्य संहारक्रमेण सम्पातस्पर्शनं कृत्वा तथा पुष्पाराधनमाचरेदिति भावः। विश्वविलयं परिकल्प्येति न केवलं बिम्बशरीरमात्रविलयमपि तु प्राकारान्तर्व्याप्तिविलापनेन सकलावरणप्रासादमूर्त्यादिविलापनमपि भावनीयमित्यभिप्रायः। एतत्प्रक्रिया च ध्यानसङ्कोचतोऽवधारणीया। सिसृक्षार्थनापूर्वमिति। क्रियाविशेषणं[३] ओं मूलपूर्वकं तत्त्वसृष्ट्यर्थमनुज्ञां देहीति प्रार्थनामन्त्रः। नाडीसन्धानाद्यपि भावनीयम्। स्वमूलमनुनेति। अयं सम्मुखीकरणहोमः। वक्ष्यति च - 'तत्कर्म साम्मुख्यदा' इति।।६३।।

सृष्टिक्रमात् स्वाखिलतत्त्वमन्त्रै-
राज्यं यथाशक्ति पृथग् जुहोतु।
हुत्वाथ मूलेन समिद्घृतादि-
द्रव्याणि होमं सुसमापयेच्च।।६४।।

---

१. 'त्येकशस्त' इति मूलकोशपाठः। २. 'तत्त्वौ तद्वत्य', ३. 'णं मू' क पाठः।

www.shripuram.org

विमर्शिनी

स्वाखिलतत्त्वमन्त्रैः स्वस्य स्वस्याखिलैस्तत्त्वमन्त्रैर्यथाशक्तिसंख्यमाज्यं पृथक् पृथक् (सृष्टिक्रमात्) जुहोतु। यथाशक्तीत्यनेन शिवे स्वानुरूपात् पञ्चतत्त्वैर्होमश्च सूचितः। अथ मूलेन समिद्घृतादिद्रव्याणि चत्वारि हुत्वा होमं सुसमापयेच्च।।६४।।

विवरणम्

यथाशक्तीत्यष्टवारमष्टाविंशतिवारमित्याद्यभिप्रायम्। शिवे त्वन्ते पञ्चतत्त्वै-रुद्घातावृत्त्या होम इष्यते। तत्त्वहोमसमये प्रतिपत्तिस्तूत्तरपटलेऽवगन्तव्यः। समिद्घृतादि-द्रव्याणीति। चतुर्द्रव्याणि वा स्वस्वाधि[1]वासहोमोक्तद्रव्याणि वा गृह्यन्ते।।६४।।

सम्पातं प्रसमर्प्य वह्निगतचैतन्यं समुद्वास्य त-
त्कुम्भे तं प्रतिजप्य साधितसमग्रात्मोदयं भावयेत्।
पीठेज्यादिविधानतः स्नपितयेत् संशुद्धतत्त्वोन्मिष-
त्स्वाङ्गं तत्कलशेन देवमथ तद्विन्यासपूर्वं यजेत्।।६५।।

विमर्शिनी

सम्पातं तत्कुम्भे प्रसमर्प्य वह्निगतचैतन्यं च समुद्वास्य तान् मन्त्रान् प्रतिजप्य तं देवं साधितसमग्रात्मोदयं साधितः सम्पादितः समग्रः सम्पूर्णः आत्मनः देवस्योदयः प्रादुर्भावो यस्मिन् कलशे तं तथा भावयेत्। अथ पीठेज्यादिविधानतः (तत्कलशेन) स्नपितयेत् स्नपितं कुर्यात्। संशुद्धतत्त्वोन्मिषत्स्वाङ्गं सम्यक् शुद्धैस्तत्त्वैः प्रकारी-भवत्स्वाङ्गयुक्तं देवं तद्विन्यासपूर्वं तत्त्वन्यासादिकं पूर्वं यथा भवति तथा यजेच्च।।६५।।

विवरणम्

तं प्रतिजप्येति। तत्त्वकलशं तत्त्वमन्त्रै[2]रभिमन्त्र्येत्यर्थः। साधितसमग्रात्मोदयं भावयेदिति। साधितः समग्रस्यात्मन उदयो यत्रेति समासः। तत्त्वहोमेन तत्कलशदेवात्मनः समग्रतयोदयो हि सम्पादितस्तं तथावस्थितमनुसन्दधीतेत्यर्थः। पीठेज्यादिविधानत इत्यावाहनतत्त्वन्यासादिकमुक्तम्। संशुद्धतत्त्वोन्मिषत्स्वाङ्गं देवं तत्कलशेन स्नपितयेदिति

---

१. 'धी' क पाठः। २. 'न्त्रैरित्य'

Shripuram Publications
www.shripuram.org

योज्यम्। संशुद्धतत्त्वोन्मिषत्स्वाङ्गमिति स्नपनकालोचितं विशेषणम्। तत्त्वकलशाभिषेके प्रतिपत्तिरनेनोक्ता। तद्विन्यासपूर्वमिति सद्यस्तत्त्वन्यासोऽपि प्राकृतसंहारन्यासाधिकतया[1] त्रिपञ्चादिवारं कर्तव्य इत्यर्थः।।६५।।

प्रागुक्तक्लृप्त्या कलशान् यथार्हं
सम्पूर्य सम्पूज्य ततोऽभिषिच्य।
सम्पूजयेद् देवमवस्रुतेन
सम्प्रोक्ष्य कुर्यात् परिषद्बलिं च[2]।।६६।।

विमर्शिनी

ततः प्रागुक्तक्लृप्त्या कलशपटलोक्तप्रकारेण (कलशान्) यथार्हं यथायोग्यं सम्पूर्य सम्पूज्य देवमभिषिच्य सम्पूजयेत्। अवस्रुतेन सर्वत्र प्रोक्ष्य परिषद्बलिं च कुर्यात्।।६६।।

विवरणम्

इदानीं द्रव्यकलशाभिषेकं दर्शयति-प्रागुक्तक्लृप्त्येति। स्नपनपटलोक्त प्रकारेण। यथार्हमिति निमित्तवित्ताद्यौचित्येन। उक्तं च-'निमित्तवित्ताद्युपपत्तिभेदित'मिति। तत्रैवं निमित्तभेदात् कलशभेदः।

---

१. 'कृ' क पाठः।

२. 'च।। सवत्सां गां दाहादिषु गुरुरुपाहूय शान्त्याख्ययेष्ट्वा
प्रदायास्यै दूर्वा तदहनि पयः पद्मपत्रेऽथ दुह्यात्।
सुमृत्पात्रे त्वातप्य घृतमपि कुर्याद् दधीति द्वितीये
तृतीये तु क्षीरं शकृदपि च गोमूत्रमप्यादधीत।।

स्वमन्त्रैराज्यान्तान्यधिकमलपत्रेष्वधः कूर्चपत्रे-
ष्वमून्याधायेष्ट्वा विधिवदपरस्मिन्नथायोज्य तानि।
मथित्वा तारेणामहितमभिमन्त्र्येषुमन्त्रैः सहस्रं
स्थलं प्रोक्षेद् दग्धं निखिलमनुना क्षालयेच्चैव बिम्बम्।।

खननादि ततः करोतु शुद्धोदकपूरेण तु पूरणं पुरोऽत्र।
चरतूदितगव्यशोधनं प्रागथवा प्लावनकं स्थलोक्षणं च।।

लेपादौ त्विष्टपीठे न्यसतु ससहा भद्रा निशा राजिदूर्वा-
क्षीरित्वक्पिष्टमग्रे शरमनुभिरधः कूर्चपात्रेऽस्त्रतो वा।

www.shripuram.org
Shripuram Publications
www.shripuram.org

"देवधाम्नि नृपश्वादिमृतौ नृश्वादिजन्मनि।
चोरशूद्राब्रह्महादिप्रवेशे चोत्तमं भवेत्।।"

इति। स्नपनमिति शेषः। चोरशूद्रायाः प्रवेशश्चोराकारेण शूद्रस्त्रियाः[1] प्रवेशः। ब्रह्महादयो महापातकिनः इह बिम्बपीठोपहतौ[2] गर्भगृहोपहतौ नाडीगृहमुखमण्डपाद्युपहतौ चोत्तमत्रयं क्रमेण स्यात्। प्राङ्कणे चेन्मध्यमवर्गः[3] बहिश्चाधमवर्गः प्राकारबहिस्तु सन्निधौ शुद्धिमात्रमित्यर्थाल्लभ्यते। गोपुरसूत्रादिषु मरणादौ विशेषः स्यादिति-

---

तद्वत् प्राच्य प्रसाध्य प्रतिकृतिममुना स्नानकाले त्रिसप्ता-
वृत्त्योद्धृष्याथवोल्लिप्य यजतु च पुरः सेकतोऽन्यत् पुरोवत्।।

क्षीरित्वगद्भिरभिषिच्य च पिप्पलत्वङ्नागाब्जकेसरसहानिजगन्धलक्ष्मीः।
तेन स्वपञ्चमनुभिस्तु यथोक्तक्लृप्त्या सिद्धेन वा समनुलिम्पतु देशिकेशः।।

श्वस्पर्शनादिविषये सकलेषु शुद्धाप्त्वग्गन्धतीर्थसलिलैरपि चावगाहः।
गव्यावगाहमनुकार्य इहापि शर्व्यां दिश्येव शान्तिहवनं तनुयादथैतत्।।

श्वसृगालादिप्रसवे तूष्णीमतिनीय तत्र दिवसानि।
त्रीण्यथ तत् स्पर्शनवत् कुर्यात् सकलं विशेषज्ञः।।

चोरकार्वन्त्यजैः स्पृष्टे बिम्बे च ब्रह्महादिभिः।
राज्यादिलिप्ते क्षुद्राणुपूजिते चोक्तशुद्धिकृत्।।

कृत्वैश्यां हुतभुङ्मुखादि दश होत्राज्यं सहस्रावरं
सावित्र्या च तिलान् स्वमूलमनुना तावत्समित्सर्पिषी।
सर्पिस्तु द्विषडर्णतो मुररिपौ होमावसाने पुन-
स्तत्सम्पातघटेन देवमभिषिच्याभ्यर्चयेत् कल्पवित्।।

भूसङ्ग्रहे स्यादिह शङ्कुसूत्रभङ्गादिषु स्वास्त्रत आज्यहोमः।
तत्कर्षणे साष्टशतादिसङ्ख्यं युगादिभङ्गादिषु मूलतो वा।।

वर्षैस्त्रिभिः कर्षणमिष्टकोपधैकेन गर्भो दिवसैर्द्विषड्भिः।
आवर्त्यतां शान्तिहुतं च कुर्यात् तदेव वर्षेण गृहे प्रवृत्ते।।

स्यात् स्थानशुद्धिर्मृतिसम्भवादौ सशान्तिहोमोऽपि यथोपपत्ति।
स्वनिष्कृतिः श्वप्रसवादिदोषे गृहे प्रवृत्तेष्वखिलेषु चापि।। नष्टेषु क ग. घ. पाठः।

---

१. 'याः ब्र', २. 'तौ ना' क पाठः। ३. 'र्गः प्रा'

Shripuram Publications
www.shripuram.org

"चण्डालश्वपचावेश उत्तमावृत्तिरिष्यते।
कारूणां चोरनृपविट्स्त्रियोरपि तु मध्यमम्।।"

इति। उत्तमावृत्तिरुत्तमस्नपनस्य त्रिपञ्चाहाद्यावृत्तिः। प्राङ्कणादिषु पूर्ववदेव। यद्वा प्राङ्कण उत्तमं बहिर्मध्यमाधममिति भेदः। कारवस्तक्षादि सप्त कर्माराः तेषां प्रवेशे मध्यमो वर्गः। तथा चोराकारेण क्षत्रियस्त्रिया वैश्यस्त्रियाः प्रवेशेऽपि भवति। प्राङ्कणे त्वधमं बहिश्शुद्धिमात्रमिति।

"चोरविट्च्छूद्रयोर्भक्तकारूणां ब्राह्मणी च या।
चोरा वन्मीकमध्वादौ विण्मूत्रादिषु चाधमम्।।"

इति[१]। चोरवैश्यस्य चोरशूद्रस्य च देवधाम्नि प्रवेशेऽधमवर्गः। भक्तास्तत्तद्देव न्यस्तधियः केवलकारुतो भक्तकारूणां स्यात् भेद इति। या चोरा ब्राह्मणी तस्याश्च प्रवेश इति योज्यम्। विण्मूत्रादिषु चेति। येषां देवधाम्नि प्रवेशोऽनुज्ञातो ब्राह्मणादीनां तेषामेतद्ग्रहणं प्राङ्कणे तु शुद्धिमात्रम्। शूद्रादीनां विण्मूत्रा[२]दिसम्भवे प्रासादे मध्यमादिवर्गः, प्राङ्कणेऽधमादिवर्ग इत्यूह्यमिति।

"वर्णसङ्करविप्रस्य सवर्णां यश्च सव्रजेत्।
अस्नातस्य च शूद्रस्य प्रवेशेऽष्टाधिकं शतम्।।"

इति। वर्णसङ्कीर्णस्य क्षत्रियादेरुत्तरो वर्गोऽर्थात् स्यात्। सवर्णां यश्च सव्रजेत् इति[३]। विप्र इति शेषः। तस्याप्यष्टाधिकं शतमिति। क्षत्रियादिगामिनस्तु न्यूनं, तथा सवर्णानामिति क्षत्रियादेरपि। क्षत्रियादेर्ब्राह्मण्या[४]दिगामितायामधिकमिति। अस्नातस्य शूद्रस्येति। यः शूद्रः स्नानेन शुद्धिमियात् न तत्स्पृष्टावपरस्य शूद्रस्य स्नानार्हता तस्य प्रवेशेऽप्यष्टाधिकं शतमिति। शूद्रमात्रे तु ततो न्यूनं रजकनापितादेः प्रवेशे त्वधमवर्गः। कारुप्रवेशे मध्यमवर्गविधानादिति।

"नृपे नवकमस्नाते वैश्ये सप्तकृतिर्भवेत्।
विप्रे च पञ्चगव्यं स्यात् चोरविप्रे तु षोडश।।"

इति। अस्नातक्षत्रियस्य प्रवेशे नवकं सप्तकृतिरेकोनपञ्चाशत्। विप्रस्य त्वस्नातस्य

---

१. 'ति। चोरशू' क पाठः। २. 'त्रस' च पाठः। ३. 'ति शे', ४. 'णा' क पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

प्रवेशे सप्तशुद्ध्यनन्तरं विधिवत् पूजितेन पञ्चगव्यकलशेन स्नपनमिति। षोडशेति केवलसप्तदशद्रव्यपरिग्रहः 'सूतकाद् द्विगुणं शाव'मिति स्थिते शावाशौचिनः शूद्रस्य प्रवेशे मध्यमवर्गः। वैश्यस्य त्वष्टाधिकं शतमित्यादि। यस्य त्वशुचेः स्पर्शेऽन्योऽपि स्नानार्हस्तस्य शूद्रादेरप्येष एव न्याय इति। पञ्चविंशतिद्रव्यवर्गवत्तदनुक्तौ[1] सप्तदशद्रव्येऽपि वर्गास्त्रयः स्युरिति। अवस्रुतेन प्रोक्ष्येति। सर्वेषां कलशानामवस्रावं तत्तदभिषेकविधावेकस्मिन् कलशेऽवस्रावयेदिति।।६६।।

*एवं तावत् सकलोपहतिषु सामान्यतः प्रतिक्रिया[2] उक्ताः। इदानीं कासुचिदुपहतिषु प्रतिक्रियाविशेषा वक्तव्याः। तत्र प्रथमं तावद्दहनादिषु स्थानशुद्धौ विशेषमाचष्टे-सवत्सामिति। शान्त्याख्ययेति। 'ओं शान्ते आगच्छ', 'ओं शान्त्यै नमः' इति च मन्त्रः। सुमृत्पात्रे त्वातप्येति। घटादौ कृत्वा पक्त्वा तक्रासेकलक्षणमातञ्चनं कृत्वा तृतीयदिने मथनकाले प्राप्ते मथित्वा नवनीतमादाय घृतं कुर्यादित्यर्थः। दधीति द्वितीयदिवस इति शेषः। सवत्सां गामित्युक्तनीत्येत्यर्थः। तृतीये त्विति दिवसे। सवत्सां गामित्युक्त[3]नीत्यैवेति।।

स्वमन्त्रैरिति। तदुक्तं-प्राहुस्तत्सवितुर्वरेण्यमित्यादि। अधिकमलपत्रेष्विति अधिगतानि कमलपत्राणि येष्विति समासः। अयमिह प्रयोगः। प्रासाददक्षिणदेश उपविश्यात्मनः सकलीकरणादि विधाय स्थण्डिले दर्भान्निक्षिप्य पञ्च पात्राणि न्यग्विलानि निधाय सम्प्रोक्ष्योत्तानीकृत्य तेषु पद्मपत्राण्य[4]वधायाधोकू[5]र्चौ[6]न्निक्षिप्य सावित्र्यादिमनुभिरमूनि गोमूत्रादीनि क्रमेण तेष्वाधाय शोषणादि कृत्वा संपूज्य पुनः स्वस्तिकधान्यपीठेऽपरं पात्रं निधाय पीठपूजादि कृत्वा पद्मपत्रमवधायाधोग्रकूर्चं निक्षिप्य तानि गव्यानि तस्मिन्नायोज्य प्रणवेन मथित्वा पञ्चतत्त्वैर्मूलेन चावाह्य संपूज्य तैरभिमन्त्रयेतेति।।

खननादीति। खननं हरणं दाह इति त्रयं कृत्वा प्रथमम[7]मुदकप्रवाहेण पूरणं विधाय यामे गते गोमूत्रविप्रपादोदकपूरणादिशेषं कुर्यात्। पुरोऽत्रेति। प्रथमम[8]धिकं पूरणं स्यादत्रेत्यर्थः। चरत्विति। अयमर्थः। दग्धे स्थाने खननादित्रयमुदकपूरणं च कृत्वा प्रासादशुद्ध्यनन्तरं बिम्बेऽपि क्षालनं विधाय यथोदितपञ्चगव्येन बिम्बं[9] संक्षाल्य शेषेण तत्स्थाने प्रोक्ष्य पुनः स्थाने प्लुतयतु। पशुमूत्रब्रह्मपादोदगव्यैरित्युक्तं प्लावनादिशुद्धिविशेषं कृत्वा बिम्बेऽपि प्लावनस्नानादिशेषं विदध्यादिति।।

---

१. 'श' क. च पाठः। २. 'प्रक्रि' घ पाठः। ३. 'त्याद्युक्त', ४. 'पञ्च पात्राण्य', ५. 'धोग्नं कू', ६. 'र्च' क पाठः। ७. 'मगतप्र', ८. 'मतिकं', ९. 'म्बं क्षा' क पाठः।
* 'सवत्सा'मित्याद्यधिकपाठमाश्रित्येयं व्याख्या।

www.shripuram.org
Shripuram Publications
www.shripuram.org

अथ बिम्बे विण्मूत्रलेपादिसम्भवे बिम्बशुद्धिषु विशेषमाचष्टे-लेपादौ त्विति। बिम्बा[1]वगाहनानन्तरमग्र[2]तः स्वस्तिकधान्यपीठे पात्रसादनपीठपूजादि विधाय तस्मिन्नधोग्रं कूर्चं निक्षिप्य लेपनीयमाधाय संस्कृत्य पूजयित्वाभिमन्त्रयेत। बिम्बेऽपि स्नानान्तं कृत्वानेन त्र्यावृत्त्या सप्तावृत्त्यैकविंशत्यावृत्त्योद्घर्षणमुल्लेपनं वा सपीठे विधाय व्यापकादि कृत्वा पूजाशेषं कुर्यात्। पुरः सेकत इति। पञ्चकाभिषेकतोऽर्वागित्यर्थः। समाधिशुद्धिसम्भवे ततोऽप्यर्वागेतदिति।

लेपान्तरमाह-क्षीरित्वग्भिरिति। पिप्पलत्वगादिद्रव्याणां क्षीरित्वक्कषायजलेन पेषणं कृत्वा लेपनीयम्। पिष्टमुत्पादनीयम्। निजगन्धशब्देन स्वस्वगन्ध[3]द्रव्यग्रहणम्।।

अथ श्वस्पर्शनादिसम्भवे बिम्बशुद्धिषु प्रायश्चित्तेषु च विशेषमाह-श्वस्पर्शनादिविषय इति। प्रसिद्धावगाहानन्तरं शुद्धजलादिभिरप्यवगाहं कृत्वा पञ्चकादि कुर्यात्।।

*द्विसप्तदशकेनांहोमुचामिति। 'अग्नेर्मन्वे' इति द्वाविंशतिः। ('यावामिन्द्रा वरुणा' इति चत्वारः।) 'योवामिन्द्रावरुणे'त्यष्टौ। एवं सम्भूय चतुस्त्रिंशतेत्यर्थः। सभद्रचरणैरिति 'भद्रं न' इति पादमन्त्र उक्तः। साष्टशतमिति दोषगौरवे साष्टसहस्रमपि कार्यमिति द्रष्टव्यम्।।

श्वादिप्रसवेऽपि विशेषं दर्शयति-श्वसृगालादिप्रसव इति। विशेषज्ञ इति।।

अथ यद्यपि चोरप्रवेशादिविषयेऽपि निष्कृतिरुक्ता पाताभिमृतिजनन-स्तेनवेशादि-केष्विति। [4]तथापि चोरादिस्पर्शे तु विशेषतरशान्तिमाह-चोरेति। कारवस्तक्षादयः।।

कल्पविदिति। स्कन्दादिषु सर्पिषो द्वितीयमूलं योज्यमिति सूचितम्।।*

एवं तावत् प्रधानस्य बिम्बस्योपहतौ प्रतिक्रियोक्ता। अथेदानीं तदङ्गानां भूम्यादीनामुपहतौ प्रतिक्रियोच्यते-भूसङ्ग्रहे स्यादित्यादि। भूपरिग्रहवेलायां शङ्कुभङ्गः सूत्रभङ्गः शङ्कुनतिर्भूम्यामनावेशः, कुभङ्ग इत्यादय उत्पाताः, तेषु सम्भूतेषु सर्वदेवेषु निजनिजास्त्रेणाष्टोत्तरशतादिप्रसिद्धसंख्यया तत्तद्दोषानुरूपेणाज्यहोमः। होमन्यायन्तु वक्ष्यति-'सतारकव्याहृतिपीठमन्त्रैरि'त्यादि। शंक्वादरकर्मकल्यत्वेऽन्यदुत्पादनीयमिति। तत्कर्षणे युगादिभङ्गादिष्विति तस्या भूमेः कर्षणे युगहलादीनां भङ्गो वृषपातशयनादिरिति बीजानामप्ररोहः फलानुत्पत्तिः खातदीर्णतो निधिकलशभङ्ग इत्यादयोऽप्युत्पतेयुरिति।।

---

१. 'म्बे', २. 'ग्रे स्व' ख च पाठः। ३. 'न्धग्र' क पाठः। ४. 'य' घ पाठः। * 'श्रीनारायणसूक्त'-मित्यादेरियं व्याख्या। * इत ऊर्ध्वमापटलान्तं घ. च. मातृकयोर्न दृश्यते व्याख्या।

www.shripuram.org
Shripuram Publications
www.shripuram.org

वर्षैस्त्रिभिः कर्षणमिति। आवर्त्यतामिति सर्वत्र सम्बध्यते। सकृत् कर्षणे कृते सति प्रासादस्त्रिषु वर्षेष्वपि नारभ्येत तदा पुनरपि कर्षणं कार्यम्। तत एव प्रासाद आरब्धव्य इति। एकेनेष्टकोपधेति। एकेन वर्षेणेष्टकोपधानमावर्तनीयम्। इष्टका अप्यपराः कार्याः इति, शान्तिहुतिश्च कार्येति। कर्षणादिषु सर्वत्रावृत्तौ पञ्चतृतैवे(?)घोरेण शान्तिहोमोऽपि कार्य इत्यर्थः। तदेवेति। प्रासादे प्रवृत्तेऽप्युपेक्षायामेकेन वर्षेण शान्तिहुतं कार्यम्। पुनश्शेषप्रवृत्तिरिति स्यात्।।

स्थानशुद्धिरिति। सम्भवो जननं यदिह परिगृहीतायां भूमौ मनुजपश्वादीनां मरणजननं विण्मूत्रासृक्पातादिर्वा स्यात् तदा खननहरणादिरूपा स्थानशुद्धिः कार्य। सशान्तिहोमेति। शान्तिहोमेऽपि स्थानशुद्ध्यनन्तरं कार्य इत्यर्थः। यथोपपत्तीति। कर्षणे कृते शान्तिहुते संख्या वर्धते इति। स्वनिष्कृतिरिति श्वसृगालप्रसवमरणादिषु स्थानशुद्धिं कृत्वा प्रागुक्तां च शान्तिं कुर्यात्। यथोपपत्तीत्यनुवर्तते। तेन त(मु?दु)चितसंख्या लभ्यते। गृह इति। यदि प्रासादान्तरं स्यात् तदा सर्वेषु अपि प्रागुक्तनिमित्तेषु सम्भवत्सुस्थानशुद्धिं विधाय दोषानुसारेण शान्तिहोमं प्रायश्चित्तहुतं वा कुर्यात्। यथोपपत्तीत्येतदिहाप्यनुवर्तनीयम् इति।।

इति प्रतिष्ठापितमन्त्रबिम्बके
विशोधनं किञ्चन सम्प्रदर्शितम्।
अथाङ्कुरादेश्च तदङ्गभावतः
प्रवर्तितस्योपहतौ तदुच्यते।।६७।।

विमर्शिनी

इति उक्तप्रकारेण प्रतिष्ठापितमन्त्रबिम्बके भूपरिग्रहादितीर्थस्नानपर्यन्तैः कर्मभिः सम्यक् स्थिरीकृत्य स्थापिते मन्त्रमये बिम्बे उत्पातेषु सत्सु विशोधनं विविधं शोधनं किञ्चन किञ्चिन्मात्रं सम्प्रदर्शितम्। निमित्तानां शोधनानां च बाहुविध्यान्न[1]ः सकलं प्रतिपादयितुमशक्यमेव। अत्र प्रासादादिस्थाने दग्धे सति शान्तिनाम्ना पयस्विनीं सवत्सां धेनुमाहूय दूर्वादिकं तस्यै दत्त्वा 'शान्त्यै नमः' इत्यनेनेष्ट्वा पद्मपत्रे पयो दुहेत्। तत्क्षीरं नवीने मृत्पात्रे प्रताप्य तक्रेण च योजयित्वा दधिभूतं तत् पलाशदण्डेन निर्मथ्य नवनीतमाहृत्य तत् प्रताप्याज्यमाहरेत्। अपरेद्युस्तथा तामेव गां तत्पूजापुरस्सरं पद्मपत्रे दुग्ध्वा तथातप्य दधि चाहरेत्। तृतीयेऽह्नि गोमूत्रं गोमयं क्षीरं च तथैव पद्मपत्रेष्वानीय

१. 'न' घ. ङ. च पाठः।

Shripuram Publications
www.shripuram.org

पृथक् पृथगधःकूर्चेषु पद्मपत्रेषु संस्थाप्य पञ्चमन्त्रैः सम्पूज्य पुनरपरस्मिन् पद्मपत्रे गोमूत्रादिक्रमेण स्वस्वमन्त्रैः संयोज्य प्रणवेन मथित्वा सम्पूज्याष्टसहस्रं स्वस्वपञ्चतत्त्वानि संजप्य तेन दग्धस्थानं सर्वं संप्रोक्ष्य प्रतिमां चाभिषिच्य भस्मादिकं त्यक्त्वा शुद्धजलैराप्लाव्य खननादिविधिं कुर्यात्। तथाच विष्णुसंहितायां-

"दाहे पयस्वतीं धेनुं शान्तिनाम्ना समाह्वयेत्।
दूर्वादिकं निवेद्येष्ट्वा पद्मपत्रे पयो दुहेत्।।
आतप्य दधि निर्मथ्य तत्संस्कृत्याज्यमाहरेत्।
अपरेद्युस्तथा दुग्ध्वा दधि चैवं प्रकल्पयेत्।।
तृतीयेऽह्नि शकृन्मूत्रं क्षीरं चैवं तथाहरेत्।
पद्मपत्रेषु सम्पूज्य क्रमान्मूत्रादिपञ्चकम्।।
पञ्चमन्त्रैस्तु संयोज्य मथित्वा प्रणवेन च।
संम्पूज्याष्टसहस्रं तु पञ्चोपनिषदो जपेत्।।
तेन संप्रोक्ष्य सर्वत्र स्नापयेत् प्रतिमां ततः।
हृत्वा भस्मादिकं तोयैः प्लावयित्वा समन्ततः।।
गोनिवासादि कर्तव्यं प्रायश्चित्तं यथाक्रमम्।"

इति। यद्यपि सामान्यशोधनानि सामान्यप्रायश्चित्तहवनानि चात्रोक्तान्येव। तथापि एतदादीनां शोधनानामनुक्तत्वाद् विशोधनं किञ्चन सम्प्रदर्शितमित्यभिहितम्। अथ तदङ्गभावतः तस्य प्रतिष्ठाकर्मणोऽङ्गतया प्रवर्तितस्य सम्पादितस्याङ्कुरादेः उपहतौ विनाशादिदोषे प्राप्ते तत्प्रायश्चित्तमुच्यते।।६७।।

नष्टेषु दुष्टेष्वथ[1]वोप्तबीजेषूप्त्वा स्वपात्रेष्वप[2]रेषु वाथ।
विशुद्धया स्वीयचिता सुयोज्य मूलाणुनावाह्य समर्चयेच्च।।६८।।

विमर्शिनी

तत्र बीजाङ्कुराणामुपहतौ प्रायश्चित्तमाह-नष्टेष्विति। अथ यथाकालं यथोक्तविधिनोप्तबीजेषु कृतवापेषु बीजेषु सत्सु केनचिद्धेतुना नष्टेषु अथ[3]वा केनचिद्धेतुना दुष्टेषु तत्र नष्टेषु चेत् स्वपात्रेषु वा दुष्टेषु चेदपरेषु वा यथायोगम् उप्त्वा वापं कृत्वा विशुद्धया स्वीयचिता स्वचैतन्येन सुयोज्य मूलाणुनावाह्य समर्चयेच्च। अत्रायं प्रकारः-

१. 'पि' ग. घ पाठः। २. 'खिलेषु' क. ग. घ पाठः। ३. 'पिवा के' क. ख. घ पाठः।

Shripuram Publication
www.shripuram.org

बीजानि केवलं नष्टान्येव चेत् तत्पात्रेष्वेव तद्बीजशिष्टैर्वापं कृत्वा तत्प्रायश्चित्तं कुर्यात्। अशुद्धियुक्तानि चेत् तद्गतचैतन्यमादर्शे हेम्नि वा समुद्वास्य दोषसम्पर्कितं सर्वं त्यक्त्वा स्नात्वा शोधिततत्स्थान एव पूर्ववत् सर्वं द्रव्यान्तरेण सम्पाद्य तथा वापं कृत्वा संक्रामितचैतन्ये वस्तुनि यथावसरं सप्तशुद्धिः कृत्वा तच्चैतन्यमायोज्यानन्तरवक्ष्यमाणं प्रायश्चित्तं कृत्वा तत्सम्पातं तत्र समर्प्य मूलाणुनावाह्य समर्चयेच्चेति॥६८॥

विवरणम्

नष्टेष्विति। सभ्यात् सुवर्णादावुद्वास्य तत्सर्वं त्यक्त्वा पुनः पूर्ववत् समुत्पाद्य पीठपूजां कृत्वा तत्र सुव.....दितिचितिं(?) प्रतिसंक्रमय्य पुनरावाहनादिकं कुर्यात्। अपरेषु वेति। पात्रदोषे पात्रान्तरोत्पादोऽपि कार्य इत्यर्थः। विशुद्धयेति। बीजानामुपहतौ सुवर्णोद्वासितचितास्सप्तशुद्धयोऽपि कार्या इत्यर्थः॥६८॥

तत्र त्र्यहात् प्राङ् निजबीजवापं
समाचरेत् तण्डुलवापमूर्ध्वम्।
हुत्वेषुतत्त्वैरिषुवर्गसङ्ख्यं
पृथग् घृतं तत्र समर्पयेच्च॥६९॥

विमर्शिनी

तत्रोपहतौ[1] त्र्यहात् अहस्त्रयात् प्राक् अर्वाक् चेद् निजबीजवापं निजनिजानां बीजानां वापं समाचरेत्। तत ऊर्ध्वं चेत् तण्डुलवापं पालिकादिषु तण्डुलेन वापम् आचरेत्। पुनस्तत्प्रायाश्चित्तमाह[2]- हुत्वेति। इषुतत्त्वैः पञ्चतत्त्वैः पृथग् इषुवर्गसंख्यं पञ्चविंशतिसख्यं घृतं हुत्वा तत्र बीजेषु समर्पयेच्च॥६९॥

सतारकव्याहृतिपीठमन्त्रः
स्वमूलमन्त्राष्टघृताभिरुद्धः।
अत्राखिलो होमविधिः समुक्तः
पूजामनुव्याहृतितारनिष्ठः॥७०॥

विमर्शिनी

अत्रत्यानां तत्तदङ्गप्रायश्चित्तानां नियममाह- सतारेति। अत्र बीजाङ्कुराद्यङ्ग-

१. 'अ' ङ पाठः। २. 'होमे इ' क. ख. ग. घ. च पाठः।

Shripuram Publications
www.shripuram.org

सम्बन्धिनि प्रायश्चित्तेऽखिलो होमविधिरेवं कर्तव्यः। कथं, तस्य तस्य पुरतः स्थण्डिलं कृत्वा यथोक्तक्रमेणाग्निमाधायाज्यसंस्कारं कृत्वा पीठपूजापूर्वं मूलेन देवमावाह्य सम्पूज्य होमः कर्तव्यः। स तु होमः सतारकव्याहृतिपीठमन्त्रः प्रथमं प्रणवव्याहृतिपीठमन्त्रहोमैर्युक्तः, स्वमूलमन्त्राष्टघृताभिरुद्धः तत्र तत्र विधीयमानः प्रायश्चित्तहोमः स्वस्वमूलमन्त्राष्टावृत्ति-घृतहोमपुटितो भवति। पूजामनुव्याहृतितारनिष्ठः पूजामन्त्रव्याहृतिप्रणवहोमावसानश्च भवति। एवं कृत्वा समाप्य तत्तत्सम्पातं तत्र तत्र समर्पयेदिति॥७०॥

विवरणम्

सतारकव्याहृतिपीठमन्त्र इति प्रणवादिभिराज्यहोम उक्तः। एवं पूजामनुव्याहृति-तारनिष्ट इति। अत्रार्थादग्नौ विधिवत् पूजापि गम्यते॥७०॥

बीजेष्वरूढेषु पूनश्च वाप-
मिच्छन्ति निष्कृत्युदितं हुतं च।
श्यामेषु तिर्यक्प्रसृतेषु चैवं
केचित्, परे निष्कृतिहोममात्रम्॥७१॥

विमर्शिनी

केचिदत्र बीजेष्वरूढेषु अङ्कुररहितेषु पुनर्वापं निष्कृत्युदितं प्रायश्चित्तार्थमुक्तं हूतं चेच्छन्ति। श्यामेषु श्यामवर्णेष्वङ्गुरेषु तिर्यक्प्रसृतेषु तिर्यगेव प्रसृतेष्वपि एवं पुनर्वापं प्रायश्चित्तं चेच्छन्ति। परे तु पुनर्निष्कृतिहोममात्रं न पुनर्वापमिच्छन्ति॥७१॥

बलिग्रहद्रव्यविपर्यये त
ल्लोपेऽपि मूलाष्टशताज्यहोमम्।
कुर्याद् यथार्हं च बलिं करोतु
तथा सपर्यासवनात्ययेऽपि[1]॥७२॥

---

१. 'पि॥ बिम्बं प्रागुदवासतोऽशुचि यदि प्रक्षाल्य पुण्याहकं
कुर्याद् द्रव्यघटाभिषेकमुदवासं चोदवासे यदि।
पश्चाच्चेन्निजशुद्धिशान्तिहवनं स्वद्रव्यकुम्भाभिषे-
काद्यं स्थापनतो नवीकरणमेव त्वाभिषेकाद् बुधः॥ न-' ग. घ पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

बलिग्रहद्रव्यविपर्यये बलिदेवतानां बलिद्रव्याणां वा व्यत्यासे, तल्लोपे बलेरभावेऽपि मूलाष्टशताज्यहोमं कुर्यात्। यथार्हं स्वस्वयोग्यं च बलिं करोतु। सपर्यासवनात्यये त्रिषु कालेष्वप्युक्त[1]लक्षणपूजाकालातिपातेऽपि तथा मूलाष्टशताज्यहोमं करोतु।।७२।।

विवरणम्

तथा सपर्यासवनात्ययेऽपीति। सवनपूजानां कर्तव्यानां तत्तत्सवनादिपातेऽपीति बीजाङ्कुरपूजाविषये।।७२।।

नन्द्यादितत्तन्मनुना ध्वजोपघाते घृतं साष्टशतं जुहोतु।
कुर्वीत शर्वे क्षुरिकाणुनैवं तदन्यतोऽस्त्रेण च वस्त्रदाहे।।७३।।

विमर्शिनी

ध्वजोपघाते ध्वजानां विनाशे नन्द्यादितत्तन्मनुना तत्तद्ध्वजदेवतामन्त्रेण साष्टशतं घृतं जुहोतु। शर्वे वस्त्रदाहे वक्ष्यमाणेन क्षुरिकाणुना, तदन्यतः तदन्यदेवेषु अस्त्रेण च एवमष्टशतं घृतहोमं कुर्वीत।।७३।।

विवरणम्

* बिम्बं प्रागिति। यदि तावत् बिम्बपरिगृहीते सति जलाधिवासतोऽर्वाक्तस्योपहतिः स्यात् तदा बिम्बपरिग्रहसमये यथा क्षालनपर्यन्ता शुद्धिः कृता तथा शुद्धिं विधाय पुण्याहं कुर्यात्। उदवास(तो) यदीति अशुचीत्यनुषङ्गः। तदा च क्षारजलत्वाच्चण्डाल-पतिताद्युपहतत्वाज्जलाशयस्याशुद्धौ तदधिवासितस्याशौचम्। यद्वा तदधिवासकाले चण्डालपतितादिभिः स्नानादिकरणादिति। पूर्ववत् क्षालनमिहापि कार्यम्। पश्चाच्चेदिति। जलाशयादुद्धारे कृते सत्यर्वाक् प्रतिष्टातो यद्यशुचिः स्यादित्यर्थः। निजशुद्धिशब्देन उदवासानन्तरविहिता प्रायश्चित्तविहिता वा शुद्धिर्विवक्ष्यते। स्थापनतः पश्चाच्चेदशुचि-त्यनुषङ्गः। बुधशब्देन नवीकरणप्रक्रियानन्तरपटले भविष्यति।।

---

१. 'क्ष' क. ख. घ. च पाठः।

* अधिकपाठमाश्रित्येयं व्याख्या।

Shripuram Publications
www.shripuram.org

प्रपूरितद्वारघटोपघाते[1] तत्स्थानसंस्थं परिपूर्य चान्यम्।
तत्सिद्धतोयेन परेण वेष्टेवा स्वास्त्रोत्थ[2]सम्पातमिहार्पयेच्चं[3]।।७४।।

विमर्शिनी

प्रपूरितद्वारघटोपघाते द्वारघटोद्वासनात् प्राग् विनाशे सति तत्स्थानसंस्थमन्यं घटं तत्सिद्धतोयेन भिन्नघटात् तोयं लभ्यते चेत् तेन, न लभ्यते चेत् परेण जलेन परिपूर्य इष्ट्वा इह स्वास्त्रोत्थसम्पातं स्वास्त्राष्टशतघृतहोमसम्पातमर्पयेच्च।।७४।।

विवरणम्

प्रपुरिताशेषघटोपघात इति। बिम्बशुद्धिकलशेषु द्वारतोरणविद्येश्वरादिकलशेषु वास्तुनिष्कृत्यादिकलशेषु द्रव्यकलशेष्वपीत्यर्थः। तत्स्थानसंस्थमन्यं तत्सिद्धतोयेन परेण वा परिपूर्येति योज्यम्। कलशभङ्गतावत् तत्रापरं कुम्भं निधाय भज्यमानकलशोदकेन पूरणं मण्डूकादिपाततोऽशुचावन्येनोदकेन पूरणं किन्तु तदा सुवर्णादावुद्वास्य तच्छुद्धिं प्रागुक्तवत् कृत्वा प्रपूरितकुम्भे सङ्क्रमयितव्यम्।।७४।।

सामान्यजातदहनापदि भस्म हृत्वा
त्रिर्गोशकृद्गुलिकयायतनं विशोध्य।
कृत्वाग्निमष्टगुणितेरितसंस्क्रियभि-
सङ्ख्यं सुधीर्ध्रुवघृताहवनं विधाय।।७५।।

हुत्वा चतुर्ग्रहघृतं विधिवन्मनस्व-
त्याज्यं स्रुवेण च[4] सभूःप्रभृतीषुतत्त्वैः।
आवाह्य मूलमनुना परिपूज्य मूले-
नास्त्रेण चाष्टशतमाज्यहुतिं विदध्यात्।।७६।।

---

१. 'ताशेषध' क. ग. घ पाठः। २. 'स्त्राणुस' इति मूलकोशपाठः। ३. 'च्च।।
मिन्दाहुतिश्चापि सजीवनिद्राब्रह्माख्यकुम्भेशघटोपघाते।
निरम्बुरेकादिषु मूलमन्त्राभिमन्त्रितापूरितमर्चयेच्च।।
पातादिश्चक्रिकादीनां यदि स्यात् तद् यथापुरम्।
कृत्वान्यद् वा बुधः कुर्यान्मूलमन्त्राभिमन्त्रणम्।।
ध्वजतोरणमङ्गलादि चेत् स्यात् स्खलितोल्लङ्घितभिन्नदग्धमत्र।
निजशान्तिहुतं चरेद् विभेदेऽप्यशुचिस्पृश्यपि चापरं च कल्प्यम्।। सा' क. ग. घ पाठः।
४. 'सहभूः' क. ग. घ पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

अथाग्निनाशादिप्रायश्चित्तमाह- सालान्येति। सामान्यजातदहनापदि सामान्येन प्रायश्चित्तहोमाद्यर्थमुत्पादितस्याग्नेर्विनाशे सति तत्रस्थं भस्म हृत्वा त्यक्त्वा तदायतनं तत्कुण्डान्तर्भागं गोशकृद्गुलिकया गोमयपिण्डेन त्रिस्त्रिधा विशोध्याग्निं कृत्वा निक्षिप्य अष्टगुणितेरितसंस्क्रियाभिसंख्यम् अष्टभिर्गुणिता प्राक्प्रोक्ता संस्कारसंख्या यथा भवति तथा ध्रुवघृताहवनं तारेण घृतहोमं सुधीः गर्भाधानादिसंस्कारविशेषज्ञो गुरुः विधाय मनस्वत्या 'मनोज्योतिरि'त्यनेन विधिवत् चतुर्ग्रहघृतं चतुरवदानेन परिगृहीतमाज्यं स्रुचा हुत्वा सभूःप्रभृतीषुतत्त्वैः भूरादिभिः पञ्चतत्त्वैश्च स्रुवेण च हुत्वा मूलमनुनावाह्य परिपूज्य पूनर्मूलेनास्त्रेण चाष्टशतमाज्य[1] हुतिं विदध्यात्।।७५, ७६।।

विवरणम्

* ब्रह्माख्येति सकलब्रह्मकलशाभिप्रायम्। तत्त्वकलशस्याप्ययमेव न्यायः। यद्वाख्य-शब्देनैतदभिहितं द्रष्टव्यम्। निरम्बुरेकादिष्विति। क्षरणविस्मरणादिवशाज्जनाभावे जलस्य रेचने क्षरणे द्रव्यकलशेषु पुनरुक्तपूरणाभावे चेत्यर्थः। अत्र स एव कुम्भो भवति। चकारो होमोपलक्षणार्थः।।

चक्रिकादीनामिति चक्रिकाकूर्चपल्लववाससामत्र कृतानां ग्रहणम्। पातादिः पतनभङ्गविस्मरणादिः। अन्यद्वेति। पूर्वस्याकर्मकल्यत्व इति भावः। वक्ष्यति च-विभेदेऽप्यशुचिस्पृश्यतीति।।

मङ्गलादीति। आदिशब्देन रत्नादिग्रहणम्।।

सामान्यजातदहनापदीति। सामान्यपदमग्निपदेन योजनीयम्। जातपदं चाग्नि-विशेणम्। सर्वेषामधिवासतत्त्वप्रायश्चिताद्यग्निनां जातानां विनाशे सतीत्यर्थः। अत्रावह्येति वक्ष्यमाणत्वात् प्रागावाहितचितमभिदेवतात्मकमायतने निष्कलं विभाव्य भस्मापनयन-मित्यवबोद्धव्यम्। सुधीरिति। जननान्तरं होममध्ये वैतत्सम्भवस्तत्र होममध्यकृतपरिधि-परिस्तरणाज्यहविरादिषु तथास्थितेष्वेवाग्निराधातव्यः। कृत्वाग्निमिति। तत्र कुण्टेऽग्नि-माधायेत्यर्थः। ततः सप्ताष्टौ षोडश पञ्चैव वा यावन्तो गर्भाधानादि-संस्का(राः) तत्र पूर्वं कृताः। तत् प्रत्येकमष्टगुणितात् प्रणवेन (जि?जु) ह्वत् कुर्यात्। तत्र सप्तसु

---

१. 'ज्या' ग. ङ पाठः।

* अधिकपाठमाश्रित्येयं व्याख्या।

Shripuram Publications
www.shripuram.org

षट्पञ्चाशदष्टसु चतुःषष्टिरित्याद्यूह्यम्। उक्तावाह्य(?) मूलेनावाह्येति। प्रागायतने विभावितस्याधानार्थमेतत्। जाताग्नेर्विनाशमात्र एतदुक्तम्॥७५, ७६॥

दुष्टाग्निं मुकुरोदरे प्रतिफलय्य क्षालनाद्याः क्रियाः
कृत्वोद्वास्य ततोऽन्यतो हुतवहं सन्त्यज्य भस्मादिभिः
आलिप्यात्र विभावसुं विधिवदुत्पाद्येष्टपीठस्थत-
न्मूर्तौ पूर्वचितिं प्रणीय सकलं नाशोक्तवत् प्राचरेत्॥७७॥

विमर्शिनी

दुष्टाग्निम् अग्निरशुद्धो भवति चेत् तमग्निं मुकुरोदरे आदर्शान्तर्भागे प्रतिफलय्य संक्रमय्य क्षालनाद्याः क्रियाः सप्तशुद्धीः कृत्वा ततोऽन्यतः आदर्शहिरण्यादावुद्वास्याशुद्धस्थलगतैर्भस्मादिभिः सह तं हुतवहमग्निं सन्त्यज्य गोमयजलेनालिप्यात्र विभावसुमग्निं विधिवत् पूर्ववदेवोत्पाद्य जनयित्वा इष्टपीठस्थतन्मूर्तौ पीठपूजानन्तरं मूर्तिकल्पनायां कृतायां पूर्वचितिं शुद्धामादर्शादिषु स्थितां तत्र प्रणीय योजयित्वा नाशोक्तवत् 'मनस्वत्या' चतुर्ग्रहघृतहोमादिकं सकलं प्राचरेत्॥७७॥

विवरणम्

अथ सतोरेऽशुद्धावित्याह- दुष्टाग्निमिति। मुकुरं दर्पणं। उद्वास्य तत इति। सुवर्णादाविति भावः। विधिवदुत्पाद्येत्यायतनकरणम्। गर्भाधानादियथोक्तसंस्कारा इत्यादि। तदुक्तं- सकलं नाशोक्तवदिति। मनस्वत्यादिकमुक्तम्। नात्रार्थात् पुनरावाहनमिष्यते। यदा पुनरायतनस्यापि जलसंस्पर्शनादिवशात् बाधः तदा ततः स्थानादुद्वास्यायतनं कृत्वोक्तवदग्निमुत्पाद्य तत्र संक्रमणीयम्। (त)दाप्यशुद्धौ शुद्धयोऽपि कार्या इति॥७७॥

अशुचौ शुचौ त्रिमनुनेत्यथाग्नये-
पवमानपावकशुचिप्रभेदिना।
स्रुवतः स्रुचा सचतुराज्यया हुनेद्
विधिवत् तदृग्भिरथवा यथाबलम्॥७८॥

Shripuram Publications
www.shripuram.org

विमर्शिनी

अशुद्धौ विशेषमाह- अशुचाविति। शूचावग्नौ अशुचौ अशुद्धे अथ अग्निनाशोक्त-प्रायश्चित्तानन्तरम् अग्नयेपवमानपावकशुचिप्रभेदिना 'अग्नये पवमानाय स्वाहा' 'अग्नये पावकाय स्वाहा' 'अग्नये शुचये स्वाहा' इति भेदत्रययुक्तेन त्रिमनुना मनुत्रयेण यथाबलम् अशुद्धेर्बलाबलवशात् स्रुवतो वा सचतुराज्यया चतुर्गृहीतघृतयुक्तया स्रुचा वा हुनेत्। अथवा तदृग्भिः 'अग्न आयुंषि पवसे', 'अग्ने पवस्व', 'अग्ने पावकरोचिषा', 'स नः पावकदीदिवः', 'अग्निः शुचिव्रततमः', 'उदग्ने शुचयस्तव' इति द्वौ द्वौ मन्त्रावुक्त्वा विधिवत् तिष्ठन् पूर्णां हुनेत्।।७८।।

विवरणम्

अशुचौ शुचाविति। शुचिरग्निः। यदाग्नेरशुद्धिमात्रं नोद्वासनाद्युचितः यथा तदेयं निष्कृतिः स्यात्। यदा द्वारि 'अग्न आयूंषि', 'अग्ने पवस्व', 'अग्ने पावक', 'स नः पावक' इति, 'अग्निः शुचिव्रततमः', 'उदग्ने शुचयः' इतिवदिति क(लो?लशो)क्तवदेवे-त्यर्थः।।७८।।

प्रागाद्याशाहुताशापदि सपदि निधायाग्निमाचार्यकुण्डा-
दाज्ये सिद्धेऽत्र हुत्वा समिधमपि चतुस्सङ्गृहीतं स्रुचाज्यम्।
तत्तद्दिक्चोदितेनाहितशिखिनि हुनेत् पञ्चहोत्रादिकेन
स्वीयेऽपादानवह्नौ स्रुवहुतिदशकं चैकहोत्रादिमन्त्रैः।।७९।।

विमर्शिनी

प्रागाद्याशाहुताशापदि अधिवासप्रायश्चित्तादिहोमेषु दिक्षु विहृतानामग्नीनां नाशे सपदि तदानीमेव भस्मादित्यागा(न)न्तरं गोशकृद्गुलिकयायतने शुद्धे सति आचार्यकुण्डादग्निं पुरोवन्निधाय आहितशिखिनि निक्षिप्ताग्नौ आज्ये सिद्धे सति अत्रैकां समिधमपि हुत्वा चतुस्सङ्गृहीतमाज्यं स्रुचा तत्तद्दिक्चोदितेन पञ्चहोत्रादिकेन मन्त्रेण हुनेत्। आचार्यः स्वीयेऽपादानवह्नौ स्वकुण्डस्थाग्नौ एकहोत्रादिमन्त्रैः 'ब्राह्मण एको होता', 'अग्निर्द्विहोता', 'पृथिवी त्रिहोता', 'अन्तरिक्षश्चतुर्होता', 'वायुः पञ्चहोता', 'चन्द्रमाष्षड्ढोता', '[१]अन्नं सप्तहोता', 'द्यौरष्टहोता', 'आदित्यो नवहोता', 'प्रजापतिर्दशहोता' इत्येभिर्दशभिः

१. 'ग्नि' क पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

स्रुवहुतिदशकं च हुनेत्॥७९॥

विवरणम्

एवमेकाग्नौ सर्वमुक्तमथानेकाग्निषु विशेषमाह-प्रागाद्याशाहुताशापदीति। अधिवासहोमे प्रायश्चित्तहोमे च दिक्ष्वग्निसम्भवः। आपद् विनाशः। सपदीति। सद्य एव। निधायाग्निमिति। भस्म हृत्वा गोमयगुलिकयायतनमिहापि शोधनीयम्। आज्ये सिद्ध इति। होममध्ये चेत् पूर्वसिद्धमाज्यं भवति। अन्यदा त्वाज्यमेतदर्थमेव संस्कर्तव्यमिति। आहितशिखिनीत्याहितेऽग्नौ। तस्मिन् दिक्कुण्डाग्नाविति यावत्। स्वीयेऽपादानवह्नावित्येवं निर्देश उपपत्तिसूचनार्थः। अयमभिप्रायः॥७९॥

प्राग्याम्यसौम्यदिक्षु स्युः पञ्चचतुष्षडादिहोतारः।
प्रत्यग्विदिक्षु विहिता मनस्वती च क्रमेण तन्मन्त्राः॥८०॥

विमर्शिनी

प्राग्याम्यसौम्यदिक्षु पूर्वदक्षिणोत्तरदिक्षु क्रमात् पञ्चचतुष्षडादिहोतारः पञ्चहोता चतुर्होता षड्ढोता च। प्रत्यग्विदिक्षु च प्रत्यग्भागे कोणेषु च। मनस्वती च तन्मन्त्रा विहिताः। पञ्चहोत्रादीनां मन्त्रान् वक्ष्यति॥८०॥

विवरणम्

प्रत्यग्विदिक्ष्विति। पश्चिमकुण्डे च विदिक्षु चेत्यर्थः॥८०॥

करोतु सावान्तरपूर्णमष्टशः
स्रुवाहुतिं व्याहृतिपञ्चतत्त्वकैः।
प्रणीतवह्नावथ मूलपावके
स्वमूलमन्त्रेण शतं च साष्टकम्॥८१॥

विमर्शिनी

अथ प्रणीतवह्नौ निक्षिप्ताग्नौ व्याहृतिपञ्चतत्त्वकैः नवभिर्मन्त्रैः सावान्तरपूर्णम् अन्तरान्तरा स्वस्वपूर्णाहुत्या संयुतमष्टशः[1] स्रुवाहुतिं करोतु। मूलपावके आचार्यकुण्डे स्वमूलमन्त्रेण साष्टकमष्टसहितं[2] शतं च स्रुवाहुतीः करोतु॥८१॥

---

१. 'सहितं' ख. घ. ङ पाठः। २. 'ष्टकस' ख. घ. च पाठः।

Shripuram Publications
www.shripuram.org

नष्टे मूलविभावसौ वसुपदिक्कुण्डान्निधायाखिलं
तस्मिन्नष्टगुणेष्टसंस्कृतिहुतिं तन्निष्कृतिं चोक्तवत्।
कृत्वोदग्दहनं प्रणीय विनिधायास्मिन् स्वनाशोदितं
कुर्यान्निष्कृतिकर्म मूलदहने तद्वद् दशात्माहुतिम्॥८२॥

विमर्शिनी

मूलविभावसौ आचार्यकुण्डस्थाग्नौ नष्टे सति वसुपदिक्कुण्डाद् उत्तरदिग्गतात् कुण्डाद् अखिलमग्निं तस्मिन् आचार्यकुण्डे निधाय अष्टगुणेष्टसंस्कृतिहुतिं स्वस्वसंस्कारसंख्याष्टगुणसंख्याहुतिम् उक्तवत् पूर्वोक्तप्रकारेण तन्निष्कृतिं सामान्यनाशप्रायश्चित्तं च कृत्वा उदग्दहनम् उदक्कुण्डेऽग्निं प्रणीय नीत्वा निधायास्मिन् कुण्डे स्वनाशोदितं निष्कृतिकर्म विधिवत् कुर्यात्। मूलदहने तद्वत् तदुक्तप्रकारेण एकहोत्रादिमन्त्रैर्दशात्माहुतिं च कुर्यात्॥८२॥

विवरणम्

नष्टे मूलविभावसाविति। वसुपदिक्च्छब्देनोत्तरदिगुच्यते। अखिलं कृत्स्नं भस्माङ्गारजातम्। इष्टसंस्कृतिशब्देन षट्सप्तादि तदुक्तसंस्कारग्रहणम्॥८२॥

नष्टेऽस्मिन् दहनद्वये विधिवदुत्पाद्य[1] स्वकुण्डेऽनलं
चित्तिस्रुक्प्रमुखैः पृथक् चतुरवत्ताज्यं स्रुचा होतृभिः।
षड्भिः स्रुसर्पिरपि वेण दशमन्त्रैरेकहोत्रादिभि-
र्भूराद्यैश्च पृथक् चतुर्ग्रहघृतं भङ्क्त्वाष्टधात्राहुनेत्॥८३॥

विमर्शिनी

अथास्मिन् दहनद्वये आचार्यकुण्डोदक्कुण्डस्थाग्निद्वये नष्टे सति विधिवदाचार्यः स्वकुण्डेऽनलमुत्पाद्य चित्तिस्रुक्प्रमुखैः षड्भिर्होतृभिः पृथक् चतुरवत्ताज्यं स्रुचाहुनेत्। पुनरेकहोत्रादिभिर्दशभिर्मन्त्रैः सर्पिः स्रुवेणापि हुनेत्। अत्रोभयस्यापि नाशे भूराद्यैश्चतुर्भि-श्चतुर्ग्रहघृतं पृथगष्टधा भङ्क्त्वाष्टधा मन्त्रं चोक्त्वा आहुनेत्॥८३॥

विवरणम्

नष्टेऽस्मिन्निति। आद्यकुण्डमाचार्यकुण्डम्। षट्भिर्होतृभिरिति सम्बन्धः। भूराद्यैश्चेति॥८३॥

---

१. 'द्याद्यकु' क. ग. घ पाठः।

Shripuram Publications
www.shripuram.org

प्रत्येकं शरतत्त्वकैश्चतुरवत्ताज्यं विभज्याष्टधा
हुत्वात्राजुहुयात् स्रुवाहुतिशतं मूलेन चाष्टाधिकम्।
नीत्वा सौम्यविभावसुं विधिवदाधायामुतो निष्कृतिं
तन्नाशाभिहितां दशात्महवनं मूलानले चाचरेत्।।८४।।

विमर्शिनी

पुनः शरत्त्वैः पञ्चतत्त्वैः प्रत्येकं चतुरवत्ताज्यं तथा विभज्य हुत्वा अत्रैवाष्टाधिकं स्रुवाहुतिशतं मूलेनाजुहुयात्[1]। पुनरमुतोऽस्मात् कुण्डात् सौम्यविभावसुम् उदक्कुण्डेऽग्निं नीत्वा तन्नाशाभिहितां तन्नाशे विहितां निष्कृतिं विधिवदाधाय मूलानले एकहोत्रादिमन्त्रैर्दशात्महवनं चाचरेत्।।८४।।

विवरणम्

अमुतो नीत्येति। आचार्यकुण्डादित्यर्थः।।८४।।

दशचतुरक्षरपूर्वौ पञ्चषडाद्यौ च सप्तपूर्वश्च।
वागाद्यश्च षडेते होतारः संस्मृताः क्रमेण स्युः।।८५।।

विमर्शिनी

षण्णां होतॄणां संज्ञाः क्रमेण कथयति-दशेति। दशचतुरक्षरपूर्वौ दशहोता चतुर्होता च, पञ्चषडाद्यौ च पञ्चहोता षड्ढोता च, सप्तपूर्वश्च सप्तहोता च, वागाद्यश्च वाग्घोता च, एते षट् क्रमेण होतारः संस्मृताः।।८५।।

विवरणम्

षड्ढोतॄन् दर्शयति - दशचतुरक्षरपूर्वावित्यादि। दशहोता चतुर्होतेत्याद्याख्या।।८५।।

चित्तिः स्रुक् पृथिवीहोताग्निर्होता ततश्च सूर्यन्ते।
तदनु महाहविराद्यो वागाद्यः स्युर्वशादिहोतारः।।८६।।

---

१. 'ज्यं जुहु' क पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

होतॄणां मन्त्रान् क्रमेण कथयति-चित्तिः स्रुगिति। एते दशादिहोतारः। चित्तिः स्रुगिति दशहोता, पृथिवीहोतेति चतुर्होता, अग्निर्होतेति पञ्चहोता, सूर्यन्त इति षड्ढोता, महाहविरित्याद्यः सप्तहोता, वागाद्यो वाग्घोता, इति विभागः।।८६।।

प्रासाददक्षिणदिगाद्युदिताग्निनाशे -
ऽप्युत्पाद्य तं स्वहरिदुक्तचतुर्ग्रहाद्यम्।
कुर्वीत वैवमथ तत्त्वहुताशनादि-
नाशेऽखिलं गुरुकृशानुविनाशवच्चं[१]।।८७।।

विमर्शिनी

प्रासाददक्षिणदिगाद्युदिताग्निनाशे प्रासादस्यापि दक्षिणादिदिग्विभागे-नोत्पादितानामग्नीनां नाशे तमग्निं सामान्यनाशोक्तक्रमेणोत्पाद्य एवं स्वहरिदुक्तचतुर्ग्रहाद्यं स्वस्वदिगुक्तहोत्रा चतुर्ग्रहघृतहोमाद्यं कुर्वीत। वा अथवा सामान्या[२]ग्निनाशवदेव कुर्वीत। अथ तत्त्वहुताशनादिनाशे तत्त्वहोमादिप्रधानाग्नेर्नाशे दोषयुक्ते च गुरुकृशानुविनाशवद् आचार्यकुण्डस्थाग्निनाशवद् अखिलं प्रायश्चित्तं कुर्वीत।।८७।।

विवरणम्

स्वहरिदुक्तचतुर्ग्रहाद्यमिति। यथा दक्षिणदिशि चतुर्होत्यादि। इति तत्त्वहोमाग्नेर्दिक्समवायाभावा(दा)चार्यकुण्डवन्न्यायः।।८७।।

* कल्पोक्तवदिति। ङेन्ताख्ययेति। 'अग्नये विपचये स्वाहे'ति। वि निजमन्त्रतो वेति।। +

मनोज्योतिरयाश्चाग्ने यदस्मिन् स्वस्तिनोऽपि च।
मिन्दाद्वयं व्याहृतयश्चोक्ताः स्युः सर्वनिष्क्रियाः।।८८।।

---

१. 'च्च।।

कल्पोक्तवत् सति जुहोतु मिथोऽग्निसंसर्गादाविहातिविहृतिप्रभृतेर्यथार्हम्।
ङेन्ताख्यया स्रुवहुतिं निजमन्त्रतो वा पूर्णं स्रुवाष्टहुतिमप्यथ मूलतश्च।। म'

क. ग. घ. पाठः। २. 'न्ययाग्नि' क. ख. घ. च. पाठः

* कल्पोक्तवदित्यधिकपाठमाश्रित्य प्रवृत्तेयं व्याख्या।

+ इत ऊर्ध्वमापटलान्तं न दृश्यते व्याख्येयम्।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

प्रायश्चित्तेऽपरिज्ञाते सर्वप्रायश्चित्तं पूर्वैरुक्तं विमृशति-मनोज्योतिरिति। 'मनो ज्योतिः', 'अयाश्चाग्ने', 'यदस्मिन् कर्मणः'[1], 'स्वस्ति नः', मिन्दाहुतिद्वयं व्याहृतयश्च दशैताः सर्वनिष्क्रियाश्चोक्ताः।।८८।।

कृष्णलाविंशतिमितं जातरूपं द्विजोत्तमे।
दत्तं स्यात् सर्वदोषेषु प्रायश्चित्तमनुत्तमम्।।८९।।

विमर्शिनी

अथ प्रायश्चित्तानामूनातिरेकपरिहराय ब्राह्मणतर्पणादिकमपि कार्यमित्याह-कृष्णलेति। कृष्णलाविंशतिमितं कृष्णला गुञ्जाफलं तद्विंशतिमितं जातरूपं हिरण्यं द्विजोत्तमे वैदिकविषयं तान्त्रिकविषयं च प्रायश्चित्तविधानज्ञे ब्राह्मणे दत्तं सर्वदोषेष्वनुत्तमं प्रायश्चित्तं स्यात्।।८९।।

क्रियामध्येऽन्तरा गच्छेद् यदि तत्र मनस्वतीम्।
जुहोतु सर्वयज्ञं वा तत्तद्दोषोपपत्तितः।।९०।।

विमर्शिनी

अथान्तरागमने प्रायश्चित्तविशेषमाह-क्रियामध्य इति। यत्र कुत्रचित् क्रियामध्ये यः कश्चिदन्तरा मध्ये गच्छेद् यदि तत्र मनस्वतीं जुहोतु। अथवा तद्गौरवे सर्वयज्ञं जुहोतु। पञ्चदुर्गामनस्वतीव्याहृतिभिः पूर्णाहुतिः सर्वयज्ञमित्युच्यते।।९०।।

स्नानाय क्लृप्तकलशेऽशुचितां प्रपन्न
स्वर्णेऽमुना समभिषिच्य विशोध्य तत्स्थम्।
चैतन्यमन्यकलशे सुविशोधितैत-
तस्थानस्थिते समधिरोप्य यथाविधीष्ट्वा।।९१।।

स्वैः पञ्चतत्त्वमनुभिः पृथगष्टवारं
सर्पिः स्रुवेण चतुरात्तघृतं स्रुचा च।
हुत्वाष्टधा पृथगथाष्टशतं स्वमूले-
नास्त्रेण चार्प्य घृतमत्र जपेच्च तावत्।।९२।।

---

१. 'णि' क पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ कलशानामशुद्धिसंभवादौ प्रायश्चित्तमाह-स्नानायेति। स्नानाय देवाभिषेचनाय क्लृप्तकलशे पूजिते कलशे अशुचितामशुद्धतां प्रपन्ने प्राप्ते अमुना कलशेन स्वर्णेऽभिषिच्य विशोध्य सप्तशुद्धीः कृत्वा तत्सथं चैतन्यं सुविशोधितैतत्स्थानस्थिते तत्त्यागपूर्वं तत्स्थानं संशोध्य तत्रैव पूरितान्यकलशे समधिरोप्य संयोज्य यथाविधीष्ट्वा यथायोगं तत्पुरतःस्थाग्नौ वाधिवासकुण्डस्थाग्नौ वा स्वैः पञ्चतत्त्वमनुभिः पृथक् पृथक् अष्टवारं सर्पिः स्रुवेण वा स्रुचा (वा) चतुरात्तघृतं पृथगष्टधा हुत्वाथ स्वमूलेन स्वेनास्त्रेण चाष्टशतं घृतं च हुत्वा सम्पातं कलश आर्प्य संस्पृश्य तावत् जपेच्च। अथ तेन यथाविध्यभिषिञ्चेत्।।९१, ९२।।

भिन्ने घटेऽन्यं प्रविधाय तत्र तच्छेषयुक्तान्यजलैः प्रपूर्य।
इष्ट्वा स्रुवाज्याहुतिमुक्तनीत्या विधाय शेषं विधिमादधीत।।९३।।

विमर्शिनी

घटे कलशे भिन्ने सति अन्यं कलशमत्र प्रविधाय तत्र कलशे तच्छेषयुक्तान्यजलैः भिन्नस्य कलशस्य जलं लभ्यते चेत् तच्छेषजलयुक्तान्यजलैः प्रपूर्येष्ट्वा उक्तनीत्या पञ्चतत्त्वहोमाद्युक्तनीत्या स्रुवाज्याहुतिं विधाय शेषं विधिमादधीत।।९३।।

विज्ञापिते वा कलशाधिवासे
तदेकदेशस्नपने कृते वा।
उपाहतिश्चेत् कलशे च मन्त्र-
बिम्बे च तन्निष्कृतिमादधीत।।९४।।

विमर्शिनी

कलशाधिवासे देवाय विज्ञापिते वा तदेकदेशस्नपने कृते कलशाभिषेकमध्ये वा उपाहतिर्विरोधश्चेत् कलशे मन्त्रबिम्बे च तन्निष्कृतिं तत्प्रायश्चित्तसम्पातस्पर्शनमादधीत।।९४।।

दुष्टे वा बलिकौतुके निपतिते वात्रैव संशोध्य त-
त्प्रायश्चित्तहुतिं स्वपञ्चमनुमूलास्त्रादिभिर्युक्तितः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

कृत्वा कर्म समाप्य मूलमनुबिम्बे योजयित्वा तत-
स्तत्तद्दोषबलाबलानुसरणात् कुर्याद् गुरुर्निष्कृतिम्।।९५।।

विमर्शिनी

अथ बलिकौतुकादीनामशुद्ध्यादिसम्भवे प्रायश्चित्तमाह-दुष्टे वेति। बलिकौतुके बल्यर्थं नीयमाने कर्मबिम्बे दुष्टेऽशुद्धे वा निपतिते वा अत्रैव स्थले तन्निधाय संशोध्य सप्तशुद्धीः कृत्वा स्वपञ्चमनुमूलास्त्रादिभिः पूर्वोक्तैर्युक्तितो यथाबलं तत्प्रायश्चित्त[1]ाहुतिं कृत्वा बलिकौतुके सम्पातं संस्पृश्य शेषं कर्म समाप्यान्तरेत्य मूलमनुबिम्बे योजयित्वा ततो गुरुः परापरदोषविशेषज्ञः तत्तद्दोषबलाबलानुसरणाद् निष्कृतिं कुर्यात्।।९५।।

भग्ने पथि प्रस्थितकर्मबिम्बे
देवं समायोज्य ततोऽन्यबिम्बे
निष्कृत्य शेषं सुसमाप्य मूले
नीत्याचरेन्निष्कृतिकर्म सम्यक्।।९६।।

विमर्शिनी

प्रस्थितकर्मबिम्बे बल्यर्थं तीर्थस्ना[2]नाद्यर्थं वा प्रस्थापिते कर्मबिम्बे पथि मार्गे भग्ने सति ततोऽन्यबिम्बे देवं समायोज्य निष्कृत्य सप्तशुद्ध्यनन्तरं स्वस्वपञ्चतत्त्वहोमाद्युक्तं प्रायश्चित्तं कृत्वा शेषं विधिं सुसमाप्य[3] प्रकृतकर्मशेषं विधिवत्[4] कृत्वा मूलबिम्बे नीत्वा तत्र निष्कृतिकर्म सम्यक् उत्तमविधानेनाचरेत्।।९६।।

भूरादिमन्त्रोक्तचतुर्गृहीतं[5] मनस्वतीपूर्वदशाहुतिश्च।
स्वपञ्चतत्त्वोदितसास्त्रमूलाहुतिद्विजेज्यादिरिहापि योज्याः[6]।।९७।।

विमर्शिनी

इहापि निष्कृतौ पूर्वोक्तप्रकारेण भूरादिमन्त्रोक्तचतुर्गृहीतं 'भूराद्यैश्च पृथक् चतुर्ग्रहघृतं भङ्क्त्वाष्टधात्राहुनेत्' इत्युक्तादिकं, मनस्वतीपूर्वदशाहुतिश्च 'मनो ज्योतिः', 'अयाश्चाग्ने' इत्युक्तं सर्वप्रायश्चित्तं, स्वपञ्चतत्त्वोदितसास्त्रमूलाहुतिद्विजेज्यादिः स्वस्वपञ्चतत्त्वैरष्टाष्टहोमः स्वास्त्रेण स्वमूलेन चाष्टशतहोमो ब्राह्मणतर्पणादिरपि योज्याः युक्तितः कार्याः।।९७।।

---

१. 'त्ता' क. ङ पाठः। २. 'स्था' ख. घ. च पाठः। ३. 'प्य कृ' क. ख. घ. च पाठः। ४. 'यथाव' ख. घ. ङ. च पाठः। ५. 'त' इति मूलकोशपाठः। ६. 'ज्यं' ग पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

अभिहितामिह निष्कृतिमाचरेदनुदितास्वपि कर्मविपत्तिषु
समनुचिन्त्य दुरिष्टबलाबलं त्वनुगुणं प्रकृतेर्विकृतेरपि।।९८।।

विमर्शिनी

उक्तान्यपि प्रायश्चित्तानि अनुक्तेष्वप्यतिदिश्य कुर्यादित्याह-अभिहितामिति। अनुदितासु अनुक्तासु कर्मविपत्तिषु कर्मविनाशेषु प्रकृतेर्विकृतेरपि अस्य दोषस्येदं प्रायश्चित्तमिति स्थिरीकृतं प्रकृतिः, अस्मिन् दोषे किं कर्तव्यमिति विचारो विकृतिः, तयोर्द्वयोरपि दुरिष्टबलाबलं दोषस्य तारतम्यं समनुचिन्त्य युक्तिज्ञैराचार्यैः सह सम्यग् विचिन्त्य तु विशेषतः अनुगुणं प्रायश्चित्तं यथा भवति तथा इहाभिहितामुक्तामेव निष्कृतिमाचरेत्।।९८।।

अर्चास्थानविशुद्धीः काश्चन गुरुशिक्षितास्त्ववोचाम।
अर्चकतत्साधनयोः काश्चन ताश्च ब्रवीमि विदिता याः।।९९।।

विमर्शिनी

अर्चास्थानविशुद्धीः प्रतिमायाः स्थानस्य च विशेषयुक्ताः शुद्धीः गुरुशिक्षिताः गुरुभिरुपदिष्टाः यास्ताः काश्चनावोचाम उक्तवन्तो वयम्। अर्चकतत्साधनयोः पूजकस्य पूजासाधनस्य च याः काश्चन शुद्धीः मया विदिताः अवधृतास्ताश्च ब्रवीम्यहम्।।९९।।

काये स्नानाचमनमथ विष्णोत्वमित्यादिजापो
वाचि स्वान्ते भगवदभिमर्शश्च सामान्यतः स्यात्।
कृच्छ्रं चान्द्रायणमपि घृतब्रह्मकूर्चाशनादि-
श्चोक्ता मन्वादिभिरिह विशुद्धिर्गरिष्ठे तु दोषे।।१००।।

विमर्शिनी

अर्चकशुद्धिमाह-काय इति। काये देहे स्नानाचमनं स्नानमाचमनं च सामान्यतः शुद्धिः स्यात्। वाचि अभाष्यं प्रति वाग्विसर्गे विष्णोत्वमित्यादिजापः, स्वान्ते मनसि ग्राम्यचिन्तासम्भवे भगवदभिमर्शः भगवद्ध्यानं च सामान्यशुद्धिः स्यात्। गरिष्ठे गुरुतरे दोषे सति इह मन्वादिभिः स्मृतिकोविदैः कृच्छ्रं सान्तपनादिकं, चान्द्रायणं, घृतब्रह्म-

Shripuram Publications
www.shripuram.org

कूर्चाशनादिश्च घृतप्राशनं ब्रह्मकूर्चाशनादिश्च विशुद्धिर्विशेषशुद्धिरुक्ता।।१००।।

देहे महाभूतविलायनादिः प्रत्याहृतिः स्यादखिलाक्षकेषु।
देहिन्यथ स्वोन्नयमानसेज्ये विशेषशुद्धिर्विहितार्चनादौ।।१०१।।

विमर्शिनी

अथार्चनादौ देहे महाभूतविलायनादिः भूतसंहारः शोषणादिश्च, अखिलेषु चक्षुरादिष्विन्द्रियेषु प्रत्याहृतिः विषयेभ्यो निवृत्त्यान्तर्मुखतापादनं, देहिनि जीवे स्वोन्नयमानसेज्यो स्वोन्नयः स्वस्य जीवस्य उन्नयो द्वादशान्तस्थपरमात्मनि योजनं मानसपूजा तं हृदयकमले संस्थाप्य पञ्चभूतात्मकैरुपहारैरर्चनम्, एषा [1] देहात्मनोर्विशेषशुद्धिर्विहिता।।१०१।।

शुद्धिस्तक्षणदाहभस्मकमृजानिर्णेजनं दारुमृ-
त्तेजस्तन्तुमये तथोत्पवनदर्भोद्योतने सर्पिषी।
ताम्रेऽम्लोदमृजा शकृज्जलमृजा दुर्वर्णशङ्खादिके
वस्त्रे क्षारजलोक्षणं रविकरस्पर्शश्च पट्टांशुके।।१०२।।

विमर्शिनी

पूजासाधनशुद्धिमाह-शुद्धिरिति। दारुमृत्तेजस्तन्तुमये दारवे मृण्मये स्वर्णादिमये तन्तुमये च वस्तुनि क्रमेण तक्षणदाहभस्मकमृजा[2]निर्णेजनं दारवे तक्षणं, मृण्मये दाहः, तेजोमये भस्मजलाभ्यां मार्जनं, तन्तुमये निर्णेजनं क्षालनं शुद्धिः स्यात्। तथा सर्पिषि उत्पवनदर्भोद्द्योतने गालनं, दर्भगताग्निनोद्द्योतनं च, ताम्रे ताम्रमये वस्तुनि अम्लोदमृजा अम्लजलाभ्यां मार्जनं, दुर्वर्णशङ्खादिके रजतशङ्खादौ शकृज्जलमृजा गोमयजलाभ्यां मार्जनं, वस्त्रे क्षारजलोक्षणं, पट्टांशुके रविकरस्पर्शश्च शुद्धिः स्यात्।।१०२।।

धान्ये शूर्पपरिभ्रमस्तदवधातौ तण्डुले लेपग-
न्धापायः सकले समित्कुसुमदर्भाद्येषु सम्प्रोक्षणम्।
पुण्याहं सलिलाशये शिखिशिखोद्द्योतश्च रात्र्यां क्षितौ
कर्षोल्लेखनविप्रभोजनमथास्त्राणूक्षणं वाखिले।।१०३।।

---

१. 'दोषात्म' क पाठः। २. 'जा हि नि' क ख. घ. च पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

धान्ये व्रीह्यादौ शूर्पपरिभ्रमः, तण्डुले तदवधातौ शूर्पपरिभ्रमणमवहननं च शुद्धिः स्यात्। सकले वस्तुनि लेपगन्धापायः मलादेर्लेपापायो गन्धापायश्च शुद्धिर्विहिता। समित्कुसुमदर्भाद्येषु सम्प्रोक्षणं, सलिलाशये तटाकादौ पुण्याहं पुण्याहप्रोक्षणं, रात्र्यां रात्र्यास्तमोमयत्वात् शिखिशिखोद्द्योतः अग्निज्वालयोद्द्योतनं शुद्धिः। क्षितौ कर्षोल्लेखनविप्रभोजनं कर्षणम् उल्लेखनं विप्रभोजनं च यथावकाशं शुद्धिः। अथवा अखिले वस्तुन्यस्त्राणूक्षणं शुद्धिः स्यात्।।१०३।।

अजुगुप्सितरूपा चेदुपहतिरखिलेषु साधनीयैवम्।
तच्छुद्धिरन्यथा चेत् त्यागः श्रेयानकुप्यतोऽन्येषु।।१०४।।

विमर्शिनी

अखिलेषु वस्तुषु उपहतिः अशुद्धिः अजुगुप्सितरूपा चेत् उद्वेगो न जायते यदि एवमुक्तप्रकारेण तच्छुद्धिस्तस्य तस्य शुद्धिः साधनीया। अन्यथा चेत् जुगुप्सा जायते चेत् अकुप्यतः मणिहिरण्यादेरन्येषु वस्तुषु तेषां त्याग एव श्रेयान्।।१०४।।

उक्तेष्वनुक्तेष्वपि चोपघाते-
ष्वालोच्य तज्ज्ञैः सह साधकेन्द्रः।
श्रुतिस्मृतिन्यायपरैः प्रकुर्यात्
तन्निष्क्रियां पुष्कलता तथैव।।१०५।।

विमर्शिनी

उक्तेष्वनुक्तेषु चोपघातेषु दोषेषु सत्सु साधकेन्द्रः स्वयं साधकश्रेष्ठः सन्नपि श्रुतिस्मृतिन्यायपरैः श्रुतेर्वैदिककर्मणः स्मृतेः स्मार्तकर्मणः न्यायस्याचारस्य च तात्पर्ययुक्तैस्तज्ज्ञैः सहालोच्य विविच्य तन्निष्क्रियां तत्तन्निष्कृतिं कुर्यात्। तथैव तथा भवति चेदेव पुष्कलता परिपूर्णता स्यात्।।१०५।।

इति तन्त्रसमुच्चये श्रुतार्चा-
क्रमगुप्त्यै रविजन्मसम्प्रणीते।

Shripuram Publications
www.shripuram.org

प्रकटोदितनिष्क्रियाकलापः
पटलोऽभूद् दशमोऽपि संप्रपूर्णः।।१०६।।

विमर्शिनी

पटलमुपसंहरति-इतीति। इति उक्तप्रकारेण श्रुतार्चाक्रमगुप्त्यै गुरुमुखाच्छ्रुतस्य पूजाक्रमस्य गुप्त्यै अविस्मरणाय रविजन्मसंप्रणीते रविपुत्रेण नारायणेन विरचिते तन्त्रसमुच्चये तन्नाम्नि ग्रन्थे दशमः पटलोऽपि संप्रपूर्णोऽभूत्। कथंभूतः, प्रकटोदित-निष्क्रियाकलापः प्रकटेन व्यक्तेनोक्तो निष्क्रियाणां प्रायश्चित्तानां कलापः समूहो यस्मिन् सः।।१०६।।

इति तन्त्रसमुच्चयविमर्शिन्यां
दशमः पटलः।।

www.shripuram.org
Shripuram Publications
www.shripuram.org